In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद् ग्रन्थमाला - १०१

कात्यायनमतसङ्ग्रहः

सम्पादकः, प्रधानसम्पादकश्च
डा.वि.श्रीनिवास शर्मा
निदेशकः ऐ.सि

सहायकः
के.वि.सूर्यप्रकाशः
शोधसहायकः

संस्कृतपरिषत्
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्वविद्यालयः, हैदराबाद्
२०१३

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद् ग्रन्थमाला - १०१

कात्यायनमतसङ्ग्रहः

सम्पादकः, प्रधानसम्पादकश्च
डा.वि.श्रीनिवास शर्मा
निदेशकः, ऐ.सि.

सहायकः
के.वि.सूर्यप्रकाशः
शोधसहायकः

संस्कृतपरिषत्
(राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था)
उस्मानिया विश्वविद्यालयः, हैदराबाद्
२०१३

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृतपरिषद् ग्रन्थावली - १०१

कात्यायनमतसङ्ग्रहः

ISBN - 978-93-80171-36-4

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः ।

सम्पादकः - डा.वि.श्रीनिवास शर्मा
निदेशकः

सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः

प्रथमं संस्करणम् - २०१३

मूल्यम् - १००/-

पुस्तकप्राप्तिस्थानम् - संस्कृतपरिषद्
उस्मानियाविश्वविद्यालयः
हैदराबाद् - ५०० ००७
Phone & Fax : 040 - 27070281
Email : sanskritacademyhyd@gmail.com

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series -101

KATYAYANA - MATASANGRAHA

Editor / General Editor
Dr. V. Srinivasa Sharma
Director I/c

Assisted by
K.V.Surya Prakash
Research Assistant

SANSKRIT ACADEMY
(Recognised as Adarsha Shodha Sanstha by
Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University, Hyderabad
2013

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 101

KATYAYANA - MATASANGRAHA

EDITOR - Dr. V.Srinivasa Sharma

ISBN - 978-93-80171-36-4

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Santhan, (Deemed University) Under Ministry of Human Resource Development Govt.of India, New Delhi.

Publisher	:	Director Sanskrit Academy
Sanskrit Academy	:	
First Edition	:	2013
Copies	:	300
Price	:	**Rs. 100/-**

Copies can be had from :
Director
Sanskrit Academy
(Adarsha Shodha Sansthan)
Osmania University Campus
Hyderabad - 500 007
Phone & Fax : 040 - 27070281
Email : sanskritacademyhyd@gmail.com
Web : osmania.ac.in\sanskritacademy

Printing :
Sri Uday Printers
D.No. 3-5-170/1/8/1/A
Narayanaguda, Hyderabad
Ph : 040 - 64511385

In Public domain. Digitization Muthulakshmi Research Academy

Foreword

Amongst the ancient Smrtis, Katyayanasmrti is oft-quoted in matters of Vyavahara (one of three sections of Dharmasastra, the others being Acara and Prayascitta) by later writers of Dharmasastra works. The importance of Katyayana as a judicial authority was brought to the fore by Kashi Prasad Jayaswal during his Tagore Law Lectures delivered at the University of Calcutta. This inspired a lecturer in Economics and Anthropology, Mr. Narayan Chandra Bandyopadhyaya, to collect the fragments of Katyayana's verses quoted in various Nibandhas, or digests dealing with ancient Hindu Law, and publish them as the *Katyayanamatasangraha* in 1927. Though Bandyopadhyaya aimed to collect Katyayana's verses from all available Nibandhas, due to the enormity of the task, he limited himself to four digests: *Vivadaratnakara, Viramitrodaya, Smrticandrika* and *Dayabhaga.* He also collected verses from *Parasaradharmasahita* and has given the additional material found therein (about 53 verses) as an appendix. Another appendix contains 16 verses pertaining to rajadharma from the *Rajanitiprakasika.* Having collected the verses, he arranged them in broadly two sections – the first one dealing with judicial procedure and the second one dealing with the eighteen titles of law. He also supplied a brief introduction to the book discussing the development of Law in ancient India, summarizing the contents of the work and pointing out the

In Public domain. Digitization Muthulakshmi Research Academy

aspects where Katyayana's views stand out in comparison to other works on Dharmasastra.

It is remarkable that Bandyopadhyaya who in his own words, was "never a bona-fide student of the legal texts in the traditional centres of interpretation," and the subjects which he taught were quite removed from Katyayanasmrti has completed such a stupendous task with such high quality. Where Bandyopadhyaya could collect 826 verses from four digests and another 53 from the *Parasaradharmasahita*, the eminent expert on Dharmasastra, P. V. Kane, could only increase this collection by less than a 100, in his 1933 work *Katyayanasmrtisaroddhara* (which has 973 verses) even though he referred to twenty texts. In 1942, Thus, of the nearly 1,100 verses attributed to Katyayana, the present book has about 777 verses.

Given the importance of Katyayana's work in matters of judicial procedure, the Sanskrit Academy has taken up the task of reprinting the reconstruction of Katyayanasmrti and as part of that is publishing the works of P. V. Kane and Narayan Chandra Bandyopadhyaya this year. We hope to print the verses collected by Prof. Rangaswami Aiyangar shortly. Though the book of P. V. Kane, with its translation and notes with copious cross-references, is decidedly more useful, Bandyopadhyaya's work adds value to it as it gives an arrangement different from that of Kane, and has variations in text not noted by Kane. Presently, only the

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit text collated by Narayan Chandra Bandyopadhyaya is being reprinted, without the introduction in English. Reference may be made to the Introduction in the Academy's reprint of P. V. Kane's *Katyayanasmrtisaroddharah* for a detailed introduction to Katyayanasmrti.

I, on behalf of Sanskrit Academy, Hyderabad extend my profound thanks to

Prof. S. Satyanarayana Garu, the honourable Vice - chancellor of Osmania University and the chairman of Sanskrit Academy, the officials concerned of Osmania University.

The honourable Vice Chancellor, the Registrar and the officials concerned of Rastriya Sanskrit Samsthan, New Delhi, for their encouragement and help to bring out this book successfully.

I acknowledge and thank Mr. K.V. Surya Prakash for his assistance and Mr. Shiva Senani for his timely help in bringing out this book.

Dr. V. Srinivasa Sharma

Director I/C

In Public domain. Digitization Muthulakshmi Research Academy

विषयसूची	पृष्ठसंख्या
अथ व्यवहारः	1
व्यवहारभेदाः	2
निर्णेतारः	2
सभ्याः	3
धर्मस्थानम्	4
दर्शनविधिः	4
दर्शनकालः	5
दर्शनोपक्रमः	5
आह्वानविधानम्	6
अथ प्रतिवादी	6
अथाह्वानातिक्रमदण्डः	7
अथासेधविधिः	7
अथानासेध्याः	7
अथा काकः	8
अथ प्रतिभूग्रहणम् (अथ अग्राह्याः)	8
अभियोक्त्रादीनां उक्तिक्रमः	9
अथ पूर्वपक्षः	9
उत्तरपक्षः	10
उत्तरदानम्	11
मिथ्या	12
प्राङ्न्यायः	12
अथ निरुत्तरतया कारणान्तरेणापि वा हीनत्वम्	14
प्रत्याकलितपादः	15

In Public domain. Digitization Muthulakshmi Research Academy

अथ प्रमाणानि	16
अथ लेख्यम्	18
लेख्यपरीक्षा	19
भुक्तिनिरूपणम्	22
अथ युक्तिः	23
अथ साक्षिणः साक्षिभेदाः	23
साक्ष्युद्भावनम्	25
साक्ष्यवादविधिः	26
साक्ष्यदोषाः दण्डाश्च	27
दिव्यव्यवस्था	28
विवादिजात्यादितो व्यवस्था	29
दिव्यदेशाः	30
दिव्यप्रयोगे उदकविधिः	31
विषविधिः	31
अथाग्निविधिः	31
घटारोपणविधिः	31
कोशविधिः	32
अथ शपथविधिः	32
निर्णयादिकृत्यम्	32
अथ दण्डविधयः	33
अथ कृतनिवर्तनम्	34
अथ निर्णये विशेषविधिः	35
अथ पुनर्न्यायः	35
पुनर्न्यायः	35
अथाष्टादशपदनिरूपणम्	36

In Public domain. Digitization Muthulakshmi Research Academy

अथ ऋणादाने ऋणप्रतिदातृनिर्णयः	37
अथ ऋणसमवाये दुस्साधाधमर्णविधिः	40
अथ पुत्रैरदेयानि	41
अथ वृद्धिः	41
अथाकृतवृद्धिः	41
परमवृद्धिः	42
वृद्धिनिषेधः	42
अथ आधिः	42
अथाधिसिद्धिः	43
अथ प्रतिभूविधिः	43
अथ निक्षेपः	44
अथास्वामिविक्रयः	46
अथ सम्भूयसमुत्थानम्	47
अथ दत्ताप्रदानिकम्	47
अथ दासकर्मकरादयः	49
अथ वेतनस्यानपाक्रिया।	50
अथ संविद्व्यतिक्रमः	51
अथ संविद्व्यतिक्रमे नैगमादिसंज्ञा	52
अथ विक्रीयासम्प्रदानं क्रीत्वानुशयश्च	52
अथ सीमाविवादः	53
अथ गृहादिविवादः	55
अथ राजमार्गादयः	55
अथ कृष्टाकृष्टे विशेषविधिः	56
अथ शस्यरक्षा घातश्च।	56
अथ वाक्पारुष्यम्	56

In Public domain. Digitization Muthulakshmi Research Academy

अथ दण्डपारुष्यम्	57
अथ स्तेनसाहसिकादीनां दण्डः	59
अथ स्तेनालाभे हृतदानम्	61
अथ संग्रहणम्	62
अथाभिगमदण्डः	63
अथ स्त्रीधर्मतरङ्गे स्त्रीरक्षा	63
अथ स्त्रीधर्मे नियोगः परपूर्वाविधिश्च	64
अथ दायविभागः	65
अथ जीवद्विभागादौ विधिः	65
अथावलुप्तविभागः	65
अथाप्राप्तव्यवहारादीनां धनरक्षणम्	66
अथ क्षेत्रजादीनां विभागे विशेषविधिः	66
अथ संसृष्टविभागः	66
अथापुत्रस्य धनविभागः	67
अथ विभागानधिकारिणः	67
अथ विभाज्यानि	68
अथ विभक्तलक्षणम्	69
अथाविभाज्यानि	69
अथ स्त्रीधनकृत्यम्	71
अथ स्त्रीधनविभागनिर्णयः	72
अथ स्त्रीधनलक्षणम्	73
अथ द्यूतसमाह्वयः	73

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

कात्यायनमतसंग्रहः

अथ व्यवहारः। १ - ७

[1]प्रयत्नसाध्ये विच्छिन्ने धर्माख्ये न्यायविस्तरे ।
साध्यमूलस्तु यो वादो व्यवहारः स उच्यते ।। १

* * * * * * * (x)

[2]शिष्यं क्रोधेन हन्याच्चेदाचार्यो लतया विना ।
येनात्यन्तं भवेत्पीडा वादः स्याच्छिष्यतः पितुः ।।२

[3]आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः।
वधस्तत्र तु नैव स्यात् पापं हि न वधे तु न ।।३

[4]उद्यतानां तु पापानां हन्तुर्दोषो न विद्यते ।
निवृत्तानान्तथारम्भात् ग्रहणं न वधः स्मृतः ।।४

[5]अष्टादशक्रियाभेदाद्भिन्नान्यष्टसहस्रशः।

* * * * * * * (y)

साध्यवादस्य मूलं स्याद्वादिना यन्निवेदितम् ।
देयाप्रदानं हिंसा चेत्युत्थानद्वयमुच्यते ।।५

धर्मशास्त्रार्थशास्त्रे तु स्कन्धद्वयमुदाहृतम् ।
[6]जयश्चैवावसायश्च द्वे फले समुदाहृते ।।६

[7]पूर्वपक्षश्चोत्तरश्च प्रत्याकलितमेव च ।
क्रियापादश्च तेनायं चतुष्पात् समुदाहृतः ।।७

---

(1) Sm.Ch.p.1.- Vir.M.p.5. (2) Sm.Ch.p.2. (3) Vir.M.p.25. (4) Vir.M.p.55 (5) Sm.Ch.p.3.Vir.M.p.25. (x) Some slokas seem to be missing (y) The other half is missing. (6 & 7) Sm.Ch.22. Vir.M.p.59

In Public domain. Digitization Muthulakshmi Research Academy

व्यवहारभेदाः ८-१३

[1]धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
*विवादार्थचतुष्पादः पश्चिमः पूर्वबाधकः ॥८

अत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ।
चरित्रं संग्रहे पुंसाम् राज्ञामाज्ञा तु शासनम् ॥९

[2]दोषकारी तु कर्त्तृत्वं धनस्वामी स्वकं धनम् ।
विवादे प्राप्नुयाद्यत्र धर्मेणैव स निर्णायः ॥१०

[3]स्मृतिशास्त्रं तु यत्किञ्चित् प्रथितं धर्मसाधकैः ।
कार्याणां निर्णयार्थे तु व्यवहारः स्मृतो हि सः ॥११

[4] [x]यद्यदाचर्यते [y]येन धर्म्यं वा ऽधर्म्यमेव वा।
देशस्याचरणान्[z] नित्यं चरित्रं तत्प्रकीर्त्तितम्॥१२

न्यायशास्त्राविरोधेन देशदृष्टेस्तथैव च।
यं धर्मं स्थापयेद् राजा न्याय्यं तद्राजशासनम्॥१३

निर्णेतारः १४ - २३

[5]सप्राड्विवाकस्सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥१४

[6]स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञै मौलैर्द्विजोत्तमैः ।
धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः ॥१५

[7]यदा न कुर्यान्नृपतिः स्वयं कार्यविनिर्णयम् ।
तदा तत्र नियुञ्जीत ब्राह्मणं शास्त्रपारगम् ॥१६

---

(1) Sm.Ch.p.21. (2) Sm.Ch.p.21. (3) Sm.Ch.p.22. (4) Vir.M.p.9.
* Not attributed to Katyayana but the following slokas pre-suppose these two verses, which occur earliest in Kautilya Arthasastra. Bk.III.Ch.I.p.150.
(x) यत्र (y) धर्म (z) आचरणे Vir.M.p.9.
(5) Vir.M.p.14. (6) Sm.Ch.p.33. (7) Sm.Ch.p.36, & Sm.Ch.p.30.

In Public domain. Digitization: Muthulakshmi Research Academy

दक्षं कुलीनमध्यस्थमनुद्वेगकरं स्थिरम् ।
परत्रभीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम् ।।१७

अक्रूरो मधुरः स्निग्धः क्षमायातो विचक्षणः ।
उत्साहवानलुब्धश्च वादे योज्यो नृपेण तु ।।१८

[1]ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ।।१९

यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत् ।
वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत् ।।२०

एकशास्त्रमधीयानो न विद्यात्कार्यनिश्चयम् ।
तस्मात् बह्वागमः कार्यो विवादेषूत्तमो नृपैः ।।२१

[2]कुलशीलवयोवृत्तिवित्तवद्भिरमत्सरैः ।
वणिग्भिः स्यात् कतिपयैः कुलभूतैरधिष्ठितम् ।।२२

श्रोतारो वणिजस्तत्र कर्त्तव्या न्यायदर्शने ।।२३

सभ्याः २४-३२

[3]न्यायशास्त्रमतिक्रम्य सभ्यैर्यत्र विनिश्चितम् ।
तत्र धर्मो ह्यधर्मेण हतो हन्ति न संशयः ।।२४

अधर्मतः प्रवृत्तं तु नोपेक्षेरन् सभासदः ।
उपेक्षमाणाः सनृपा नरकं यान्त्यधोमुखाः ।।२५

न्यायमार्गादपेतं तु ज्ञात्वा चित्तं महीपतेः ।
वक्तव्यं तत् प्रियं तत्र न सभ्यः किल्विषी मतः ।।२६

[4]अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः ।
तेऽपि तद्भागिनस्तस्माद्बोधनीयः शनै र्नृपः ।।२७

(1) Sm.Ch.p.37. (2) Sm.Ch.p.38, see also for 3-4. Vir.M.p.33. (3) Sm.Ch.p.47-51, also Vir.M.p.35-37. (4) Sm.Ch.pp.47-61, also Vir.M.pp.35-37.

In Public domain, Digitization Muthulakshmi Research Academy

सभ्येनावश्यवक्तव्यं धर्मार्थसहितं वचः ।
शृणोति यदि नो राजा स्यात्तु सभ्यस्ततोऽनघः ॥२८

स्नेहादज्ञानतो वाऽपि मोहाद्वा लोभतोऽपि वा ।
तत्र सभ्योऽन्यथावादी दण्ड्योऽसभ्यः स्मृतो हि सः ॥२९

कार्यस्य निर्णयं सम्यग् ज्ञात्वा सभ्यस्ततो वदेत् ।
अन्यथा नैव वक्तव्यं वक्ता द्विगुणदण्डभाक् ॥३०

अनिर्णीते तु यद्यर्थे संभाषेत रहोऽर्थिना ।
प्राड्विवाकोऽथ दण्ड्यः स्यात् सभ्याश्चैव न संशयः ॥३१

सभ्यदोषात्तु यन्नष्टं देयं सभ्येन तत्तदा ।
कार्यं तु कार्यिणामेव निश्चितं न विचालयेत् ॥३२

धर्मस्थानम्। ३३

[1]धर्मशास्त्रविचारेण मूलसारविवेचनम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत् ॥३३*

दर्शनविधिः। ३४-३९

[2]विनीतवेषो नृपतिः सभां गत्वा समाहितः ।
आसीनः प्राङ्मुखः स्थित्वा पश्येत् कार्याणि कार्यिणाम् ।
सह त्रैविद्यवृद्धैश्च मन्त्रज्ञैश्चैव मन्त्रिभिः ॥३४

[3]अस्वर्ग्यलोकनाशाय परानीकभयावहा ।
आयुर्वीर्यहरा राज्ञः सति वाक्ये स्वयं कृतिः ॥३५

[4]तस्माच्छास्त्रानुसारेण राजा कार्याणि साधयेत् ।
वाक्याभावेषु सर्वेषां देशदृष्टं मतं नयेत् ॥३६

यस्य देशस्य यो धर्मः प्रवृत्तः सार्वकालिकः ।
श्रुतिस्मृत्यविरोधेन देशदृष्टः स उच्यते ॥३७ (x)

(1) Sm.Ch.p.42. (2) Sm.Ch.p.52. (3) Sm.Ch.p.57-58 (4) Sm.Ch.p.57-58 (x) Vir.M.p.13. * धर्म्मशास्त्रानुसारेण अर्थशास्त्रविवेचनम् इति पाठभेदो दृश्यते।

In Public domain. Digitization: Muthulakshmi Research Academy

[1]देशस्यानुमतेनैव व्यवस्था या निरूपिता ।
लिखिता तु सदा धार्या मुद्रिता राजमुद्रया ॥३८

शास्त्रवद् यत्नतो रक्ष्या तां निरीक्ष्य विनिर्णयेत् ।
[2]गोत्रस्थितिस्तु या तेषां क्रमादायाति धर्मतः ।
कुलधर्मं तु तं प्राहुः पालयेत्तन्तथैव तु ॥३९

दर्शनकालः। ४०-४४

[3]आद्याद् अह्नोऽष्टभागाद्यदूर्ध्वं भागत्रयं भवेत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परं स्मृतः ॥४०

दिवसस्याष्टमं भागं मुक्त्वा भागत्रयन्तु यत् ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥४१

[4]सभास्थानेषु पूर्वाह्णे कार्याणां निर्णयं नृपः ।
कुर्याच्छास्त्रप्रणीतेन मार्गेणामित्रकर्षणः ॥४२

[5]शास्त्रेण निन्दितं त्वर्थमुख्यो* राज्ञाऽप्रचोदितः ।
आवेदयति यः पूर्वं स्तोभकः स उदाहृतः ॥४३

नृपेणैव नियुक्तो यः परदोषमवेक्षितुम् ।
नृपस्य सूचयेज् ज्ञात्वा सूचकः स उदाहृतः ॥४४

दर्शनोपक्रमः ४५-४७

[6]काले कार्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितम् ।
किं कार्यं का च ते पीडा मा भैषी ब्रूहि मानव ॥ ४५

[7]केन कस्मिन् कदा कस्मात् पृच्छेदेवम् सभां गतः ।
एवं पृष्टस्य यद् ब्रूयात् तत्सभ्यै ब्राह्मणैः सह ॥४६॥

---

(1) Sm.Ch.p.57-58. (2) Vir.M.p.29. (3) Vir.M.p.60. (4)Vir.M.p.28. (5) Sm.Ch.p.65, Vir.M.p.51 (6) Sm.Ch.p.70-72. (7) Vir.M.p.47.

* मुख्यश्चार्थं इति स्मृतिचन्द्रिकायाम ।

In Public domain, Digitization Muthulakshmi Research Academy

विमृश्य कार्यं न्यायं चेदाह्वानार्थमतः परम् ।
मुद्रां वा निक्षिपेत् तस्मिन् पुरुषं वा समादिशेत् ॥४७

आह्वानविधानम् ४८-५४

[1]अकल्यबालस्थविरविषमस्थक्रियाकुलान् ।
कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् ॥४८

मत्तोन्मत्तप्रमत्तार्त्तभृत्यान्नाह्वापयेन्नृपः ।
धर्मोत्सुकानभ्युदये रोगिणोऽथ जडानपि ।
अस्वस्थमत्तोन्मत्तार्त्तस्त्रियो नाह्वापयेन्नृपः ॥४९

न हीनपक्षां युवतिं कुलेजातां प्रसूतिकाम् ।
सर्ववर्णोत्तमां कन्यां ताः ज्ञातिप्रभुकाः स्मृताः ॥५०

तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः ।
निष्कुला याश्च पतिताः तासामाह्वानमिष्यते ॥५१

अधिकारोऽभियुक्तस्य नेतरस्यास्त्यसङ्गतेः ।
इतरोऽप्यभियुक्तेन प्रतिरोधीकृतो मतः ॥५२

दासाः कर्मकराः शिष्या नियुक्ता बान्धवास्तथा ।
वादिनो न च दण्ड्याः स्युर्यस्त्वतोऽन्यः स दण्डभाक् ॥५३

अर्थिना सन्नियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥५४

अथ प्रतिवादी ५५-५८

[2]समर्पितोऽर्थिना योऽन्यः परो धर्माधिकारिणि ।
प्रतिवादी स विज्ञेयः प्रतिपन्नश्च यः स्वयम् ॥५५

[3]ब्रह्महत्यासुरापानस्तेयगुर्वङ्गनागमे ।
अन्येष्वसभ्यवादेषु प्रतिवादी न दीयते ॥५६

---

(1) Sm.Ch.p.74, Vir.M.p.52-54. (2) Sm.Ch.p.73. (3) Vir.M.p.54, Sm.Ch.p.75.

In Public domain. Digitization Muthulakshmi Research Academy

मनुष्यमारणे स्तेये परदाराभिमर्षणे ।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ।।५७

पारुष्ये कूटकरणे नृपद्रोहे तथैव च ।
प्रतिवादी न दाप्यः स्यादर्थिप्रत्यर्थिनोरपि ।।५८

अथाह्वानातिक्रमदण्डः ५९-६१

[1]आहूतस्त्ववमन्येत यः शक्तो राजशासनम् ।
तस्य कुर्यान्नृपो दण्डं विधिदृष्टेन कर्मणा ।।५९

[2]हीने कर्मणि पञ्चाशन्मध्यमे हि (त्रि?) शतावरः ।
गुरुकार्येषु दण्डः स्यान्नित्यं पञ्चशतावरः ।।६०

[3]कल्पितो यस्य यो दण्डस्त्वपराधस्य यत्नतः ।
पणानां ग्रहणं (कार्यं) तु स्यात् तन्मूल्यं वाऽथ राजनि ।।६१

अथासेधविधिः। ६२-६३

[4] *उत्पादयति यो हिंसां देयं वा न प्रयच्छति ।
याचमानाय दौः शील्याद् आकृष्योऽसौ नृपाज्ञया ।।६२

आवेद्य तु नृपे कार्यमसन्दिग्धे प्रतिश्रुते ।
तदासेधं प्रयुञ्जीत यावदाह्वानदर्शनम् ।।६३

आसेधयोग्य आसिद्ध उत्क्रामन् दण्डमर्हति ।

अथानासेध्याः ६४-६८

यस्त्विन्द्रियनिरोधेन व्याहारोच्छ्वसनादिभिः ।
आसेधयेदनासेध्यं स दण्ड्यो न त्वतिक्रमी ।।६४

वृक्षपर्वतमारूढा हस्त्यश्वरथनौस्थिताः ।
विषमस्थाश्च ते सर्वे नासेध्याः कार्यसाधकैः ।।६५

---

(1) Vir.M.p.54, (2) Vir.M.p.54. (3) Sm.Ch.p.76. (4) Vir.Mitro.pp.55 and 56. * Sm.Ch.(p.68) attributes to Vyasn.

In Public domain. Digitization Muthulakshmi Research Academy

व्याध्यार्त्ता व्यसनस्थाश्च यजमानास्तथैव च ।
अनुत्तीर्णाश्च नासेध्याः मत्तोन्मत्तजडास्तथा ॥६६

न कर्षको बीजकाले सेनाकाले तु सैनिकः ।
प्रतिज्ञाय प्रयातश्च कृतकालश्च नान्तरा ॥६७

उद्युक्तः कर्षकः सस्ये तोयस्यागमने तथा ।
आरम्भात् संग्रहं यावत् तत्कालं न विवादयेत् ॥६८

अथा काकः। ६९-७०

एकाहद्व्यहाद्यपेक्षन् देशकालाद्यपेक्षया ।
दूताय साधिते कार्ये तेन भक्तं प्रदापयेत् ॥६९

देशकालवयः शक्त्याद्यपेक्षं भोजनं स्मृतम् ।
आकारकस्य सर्वत्र इति तत्त्वविदो विदुः ॥७०

अथ प्रतिभूग्रहणम् (अथ अग्राह्याः) ७१-७५

[1]न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा ।
निरुद्धो दण्डितश्चैव संशयस्थश्च न क्वचित् ॥७१

नैव रिक्थो न रिक्तश्च न चैवात्यन्तवासिनः ।
राजकार्यनियुक्तश्च ये च प्रवजिता नराः ॥७२

नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् ।
नाविज्ञातो ग्रहीतव्यः प्रतिभूत्वक्रियां प्रति ॥७३

अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्य वादिनः ।
स रक्षितो दिनस्यान्ते दद्याद्दूताय वेतनम् ॥७४

गृहीतग्रहणो न्याये न प्रवर्त्यो महीभृता ।
तस्य वा तत् समर्प्यं स्यात् स्थापयेद्वा परस्य तत् ॥७५

(1) Sm.Ch.p.78, Vir.M.p.57-58.

In Public domain. Digitization Muthulakshmi Research Academy

अभियोक्त्रादीनां उक्तिक्रमः।७६-७७

[1]तत्राभियोक्ता प्राग् ब्रूयादभियुक्तस्त्वनन्तरम् ।
तयोरन्ते सदस्यास्तु प्राड्विवाकस्ततः परम् ।।७६

यस्य स्यादधिका पीडा कार्यं वाप्यधिकं भवेत् ।
पूर्वपक्षो भवेत्तस्य न यः पूर्वं निवेदयेत् ।।७७

अथ पूर्वपक्षः। ७८-९३

निवेश्य कालं वर्षं च मासं पक्षं तिथिं तथा ।
वेलां प्रदेशं विषयं स्थानम् जात्याकृती वयः ।।७८

साध्यद्रव्यप्रमाणं संख्यां नाम तथात्मनः ।
राज्ञां च क्रमशो नाम निवासं साध्यनाम च ।।७९

क्रमात्पितृणां नामानि पीडामाहर्तृदायकौ ।
क्षमालिङ्गानि चान्यानि पक्षं सङ्कीर्त्य कल्पयेत्[2]।।८०

देशश्चैव तथा स्थानम् सन्निवेशस्तथैव च ।
जातिस्संज्ञा निवासश्च प्रमाणं क्षेत्रनाम च ।।८१

पितृपैतामहश्चैव पूर्वराजानुकीर्तनम् ।
स्थावरेषु विवादेषु दशैतानि निवेशयेत्[3]।।८२

देशकालविहीनश्च द्रव्यसंङ्ख्याविवर्जितः ।
क्रियाप्रमाणहीनश्च पक्षो नादेय इष्यते[4]।।८३

अप्रसिद्धं निराबाधम् निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षं * राजा विवर्जयेत्[5]।।८४

---

(1) Sm.Ch.p.79, Vir.M.p.59-60. (2) Sm.Ch.p.81, Vir.M.p.62. (3) Sm.Ch.p.84, Vir.M.p.64. (4) Sm.Ch.p.84, Vir.M.p.64. (5) Sm.Ch.p.85, Vir.M.p.66.

* असाध्यं वा विरुद्ध वा पक्षाभाषं राजा विवर्जयेत् इति वीरमित्रोदयधृतपाठः - Vir.M.P.66.

In Public domain. Digitization Muthulakshmi Research Academy

बहुप्रतिज्ञं यत्कार्यं व्यवहारे सुनिश्चितम् ।
कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया[1] ॥८५

तस्माद्युगपत् पक्षाभासतेत्येव रमणीयम् ।
अनेकवस्तुसङ्कीर्णस्यापक्षत्वन्त्वत्पदसम्बद्धम् ॥८६

न्यायस्थं + नेच्छते कर्तुं अन्यायं वा करोत्ययम् ।
न लेखयति यस्त्वेवं तस्य पक्षो न सिध्यति ॥८७

पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विवर्जितः ।
अनेकपदसङ्कीर्णः पूर्वपक्षो न सिध्यति ॥८८

आगमः परिभोगश्च व्युच्छित्तिः प्रार्थना तथा ।
एतच्चतुष्टयं प्राहुः भाषादोषास्त्वकारणाः[2] ॥८९

अधिकान् भेदयेदर्थान्* न्यूनांश्च परिपूरयेत् ।
भूमौ निवेशयेत्तावत् यावदर्थो न निश्चितः ॥९०

पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोऽभिलेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रे विशोधितम् ॥९१

अन्यदुक्तं लिखेदन्यद्योऽर्थिप्रत्यर्थिनां वचः ।
चौरवत् त्रासयेत् तन्तु धार्मिकः पृथिवीपतिः ॥९२
मोहाद्वा यदि वा शाठ्यात् यन्नोक्तं पूर्ववादिना ।
उत्तरान्तर्गतम् वाऽपि तद्ग्राह्यमुभयोरपि[2] ॥९३

उत्तरपक्षः। ९४-१०४

सद्यः कार्यम् कालप्रदानञ्च।

व्यपैति गौरवम् यत्र विनाशस्त्याग एव वा ।
कालं तत्र न कुर्वीत कार्यमात्ययिकं हि तत् ॥९४

(1) Sm.Ch.p.89, Vir.M.p.64. (2) Sm.Ch.p.90-91, Vir.M.p.70-71 + न्यायं संयच्छते - इति वीरमित्रोदयधृतपाठः (Vir.M.p.69) * अधिकाञ्छातयेत् - इति वीरमित्रोदयधृतपाठः (Vir.M.p.70)

In Public domain. Digitization Muthulakshmi Research Academy

धेनावनडुहि क्षेत्रे स्त्रीषु प्रजनने तथा ।
न्यासे याचितके दत्ते तथैव क्रयविक्रये ॥९५

कन्याया दूषणे स्तेये कलहे साहसे निधौ ।
उपधौ कौटसाक्ष्ये च सद्य एव विवादयेत् ॥९६

साहसस्तेयपारुष्ये गोऽभिशापे तथात्यये ।
भूमौ विवादयेत् क्षिप्रमकालेऽपि बृहस्पतिः ॥९७

श्रुत्वा लेख्यगतम् त्वर्थम् प्रत्यर्थी कारणाद्यदि ।
कालं विवादे याचेत तस्य देयो न संशयः ॥९८

सद्यः कृतेषु कार्येषु सद्य एव विवादयेत् ।
कालातीतेषु वा कालं दद्यात् प्रत्यर्थिने प्रभुः[1] ॥९९

कालं शक्तिं विदित्वा तु कार्याणाम् च बलाबलम् ।
अल्पं वा बहु वा कालं दद्यात् प्रत्यर्थिने प्रभुः ॥१००

सद्यः कृते सद्य एव मासातीते दिनं भवेत् ।
षडाब्दिके त्रिरात्रं स्यात् सप्ताहं द्वादशाब्दिके ॥१०१

विंशत्यब्दे दशाहं तु मासार्धं वा लभेत सः ।
मासं त्रिंशत्समातीते त्रिपक्षं परतो भवेत् ॥१०२

कालं संवत्सरादर्वाक् स्वयमेव यथेप्सितम् ।
संवत्सरं जडोन्मत्तमनस्के व्याधिपीडिते ॥१०३

दिगन्तरप्रपन्ने वा अज्ञानार्थे च वस्तुनि ।
मूलं वा साक्षिणो वाऽथ परदेशे स्थिता यदा
तत्र कालो भवेत् पुंसामा स्वदेशसमागमात् ॥१०४

उत्तरदानम् १०५-११०

दिनं मासार्धमासौ वा ऋतुः सम्वत्सरोऽपि वा ।
क्रियास्थित्यनुरूपस्तु देयः कालः परेण तु ॥१०६

(1) Sm.Ch.p.93-94.

In Public domain. Digitization Muthulakshmi Research Academy

यावान् यस्मिन् समाचारः पारम्पर्यक्रमागतः ।
तम्प्रतीक्ष्य यथान्यायम् दापयेत् उत्तरं नृपः[1] ॥१०७

उभयोर्लिखिते वाच्ये प्रारब्धे कार्यनिर्णये ।
अयुक्तम् तत्र यो ब्रूयात् तस्मादर्थात् स हीयते ॥१०८

सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा ।
पूर्वन्यायविधिश्चैवमुत्तरं स्यात् चतुर्विधम्[2] ॥१०९

अभियुक्तोऽभियोगस्य यदि कुर्यात्तु निह्नवम्[3] ।
मिथ्या तत्तु विजानीयात् उत्तरम् व्यवहारतः ॥११०

मिथ्या १११-११३

श्रुत्वा भाषार्थमन्यस्तु यदि तम्प्रतिषेधति ।
अर्थतः शब्दतो वापि मिथ्या तज्ज्ञेयमुत्तरम् ॥१११

अर्थिनाभिहितोह्यर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयादाधर्यं भृगुरब्रवीत् ॥११२

मिथ्येतन्नाभिजानामि तदा तत्र न संनिधिः ।
अजातश्चास्मि तत्काल इति मिथ्या चतुर्विधा[4] ॥११३

प्राङ्न्यायः ११४-१३४

आचारेणावसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्वं प्राङ्न्यायश्च स उच्यते[5] ॥११४

विभावयामि कुलिकैः साक्षिभिर्लिखिते न वा ।
जितश्चैव मयाऽयं प्राक् प्राङ्न्यायस्त्रिप्रकारकः ॥११५

अप्रसिद्धं विरुद्धं यदत्यल्पमतिभूरि च ।
संदिग्धासम्भवाव्यक्तमन्यार्थं चातिदोषवत् ॥११५

---

(1) Sm.Ch.p.95&96. (2) Vir.M.p.74. (3) Sm.Ch.p.97- Vir.M.p.75.
(4) Vir.M.p.76-78, Sm.Ch.p.98. (5) Sm.Ch.p.97&108, Vir.M.p.82.

In Public domain. Digitization Muthulakshmi Research Academy

अव्यापकं व्यस्तपदं निगूढार्थं तथाऽकुलम् ।
व्याख्यागम्यमसारं च नोत्तरं शस्यते बुधैः ।।११६

यद्व्यस्तपदमव्यापि निगूढार्थं तथाऽकुलम् ।
व्याख्यागम्यमसारञ्च नोत्तरम् सार्थसिद्धये ।।११७

चिह्नाकारसहस्रन्तु समयं चाविजानता ।
भाषान्तरेण वा प्रोक्तमप्रसिद्धं तदुत्तरम् ।।११८

प्रतिदत्तं मया बाल्ये प्रतिदत्तं मया न हि ।
यदेवमाह विज्ञेयं बिरुद्धम् तदिहोत्तरम्[1] ।।११९

जितः पुरा मयाऽयं च त्वर्थेऽस्मिन्निति भाषितुम् ।
पुरा ममायमिति यत्तदूनं चोत्तरं स्मृतम् ।।१२०

गृहीतमिति वाच्यं तु कार्यं तेन कृतं मया ।
पुरा गृहीतं यद्रव्यमिति यच्चातिभूरि तत् ।।१२१

देयं मयेति वक्तव्ये मयादेयमितीदृशम् ।
सन्दिग्धमुत्तरम् ज्ञेयम् व्यवहारे बुधैस्तदा ।।१२२

बलाबलेन चैतेन साहसम् स्थापितं पुरा ।
अनुक्तमेतन्मन्यन्ते तदन्यार्थमितीरितम्[2] ।।१२३

अस्मै दत्तम् मया सार्धं सहस्रमिति भाषिते ।
प्रतिदत्तम् तदर्धं यत् तदिहाव्यापकं स्मृतम् ।।१२४

पूर्ववादी क्रियां यावत् सम्यङ्नैव निवेशयेत् ।
मया गृहीतम् पूर्वं नो तद्व्यस्तपदमुच्यते ।।१२५

तत्किं तामरसम् कश्चिदगृहीतम् प्रदास्यति ।
निगूढार्थं तु तत् ज्ञेयमुत्तरम् व्यवहारतः ।।१२६

किं तेनैव सदा देयं मया देयं भवेदिति ।
एतदाकुलमित्युक्तमुत्तरम् तद्विदो विदुः ।।१२७

(1) Sm.Ch.p.98-99. (2) Sm.Ch.p.100, Vir.M.p.85.

In Public domain. Digitization Muthulakshmi Research Academy

काकस्य दन्ता नो सन्ति सन्तीत्यादि यदुत्तरम् ।
असारमिति तत्त्वेन सम्यङ्नोत्तरमिष्यते ॥१२८

पक्षैकदेशे यत्सत्यमेकदेशे च कारणम्[1] ।
मिथ्या चैवैकदेशे च सङ्करात्तदनुत्तरम् ॥१२९

न चैकस्मिन् विवादे तु क्रियास्याद्वादिनोर्द्वयोः ।
न चार्थसिद्धिरुभयोः न चैकत्र क्रियाद्वयम्[2] ॥१३०

श्रावयित्वा यथाकार्यं त्यजेदन्यद्वदेदसौ ।
अन्यपक्षाश्रयस्तेन कृतो वादी स हीयते ॥१३१

न मयाऽभिहितं कार्यमभियुज्य परं वदेत् ।
विब्रुवंश्च भवेदेवम् हीनन्तमपि निर्दिशेत् ॥१३२

लेखयित्वा तु यो वाक्यं हीनं वाऽप्यधिकं पुनः ।
वदेद्वादी स हीयेत नाभियोगं तु सोऽर्हति ॥१३३

सभ्याश्च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः[3] ।
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते ॥१३४

अथ निरुत्तरतया कारणान्तरेणापि वा हीनत्वम्। १३५-१४७

ब्रूहीत्युक्तोऽपि न ब्रूयात् सद्यो बन्धनमर्हति ।
द्वितीयेऽहनि दुर्बुद्धेर्विद्यात्तस्य पराजयम् ॥
आह्वानादनुपस्थानात् सद्य एव प्रहीयते ॥१३५

आकारेङ्गितचेष्टाभिस्तस्यभावं विभावयेत् ।
प्रतिवादी भवेद्धीनः सोऽनुमानेन लक्ष्यते ॥१३६

कम्पः स्वेदोऽथवैवर्ण्यमोष्ठशोषाभिमर्षणम् ।
भूलेखनम् स्थानहानिस्तिर्यगूर्ध्वनिरीक्षणम् ।
स्वरभेदश्च दुष्टस्य चिह्नमाहुर्मनीषिणः ॥१३७

(1) Sm.Ch.p.101, Vir.M.p.84. (2) Sm.Ch.p.102, Vir.M.p.85. (4) Sm.Ch.p.106, Vir.M.p.98.

In Public domain. Digitization Muthulakshmi Research Academy

व्याजेनैव तु यत्रासौ दीर्घकालमभीप्सति।
सापदेशम् तु तं विद्याद्वादहानिकरं स्मृतम्।।१३८

अन्यवादी पणान् पञ्च क्रियाद्वेषी पणान् दश ।
नोपस्थाता दश द्वौ च षोड़शैव निरुत्तरः ।
आहूतविपलायी च पणान् ग्राह्यस्तु विंशतिम्[1] ।।१३९

त्रिराहूतमनायान्तमाहूतविपलायिनम् ।
पञ्चरात्रमतिक्रान्तम् विनयेत्तम् महीपतिः ।।१४०

श्रावितव्यवहाराणामेकं यत्र प्रभेदयेत् ।
वादिनं लोभयेच्चैव हीनं तमिति निर्दिशेत्[2] ।।१४१

उभयोर्लिखिते वाक्ये प्रारब्धे कार्यनिश्चये ।
अनुक्तं तत्र यो ब्रूयात् तस्मादर्थात् स हीयते[3] ।।१४२

साक्षिणो यस्तु निर्दिश्य कामतो न विवादयेत् ।
स वादो हीयते तस्मात् त्रिंशरात्रात्परेण तु ।। १४३

पलायनानुत्तरत्वादन्यपक्षाश्रयेण च।
हीनस्य गृह्यते वादो न स्ववाक्यजितस्य तु।।१४४

यो हीनवाक्येन जितस्तस्योद्धारं विदुर्बुधाः ।
स्ववाक्यहीनो यस्तु स्यात् तस्योद्धारो न विद्यते[4] ।।१४५

दोषानुरूपं संग्राह्य पुनर्वादो न विद्यते ।।१४६

आवेद्य प्रगृहीतार्थाः प्रशमं यान्ति ये मिथः ।
सर्वे द्विगुणदण्ड्याः स्युः विप्रलम्भान्नृपस्य ते ।।१४७

प्रत्याकलितपादः१४८-१५३

शोधिते लिखिते सम्यगिति निर्दोष उत्तरे ।
प्रत्यर्थिनोऽर्थिनो वाऽपि क्रियाकरणमिष्यते[5] ।।१४८

---

(1) Sm.Ch.p.107, Vir.M.p.96-98-99. (2) Sm.Ch.p.108, Vir.M.p.99.
(3) Sm.Ch.p.109, Vir.M.p.103. (4) Sm.Ch.p.113. (5) Sm.Ch.p.113.

In Public domain. Digitization Mathulakshmi Research Academy

वादिना यदभिप्रेतम् स्वयम् साधयितुं स्फुटम् ।
तत्साध्यं साधनम् येन तत्साध्यं साध्यतेऽखिलम् ।।१४९

सारभूतम् पदम्भुक्त्वा निःसारानि बहून्यपि ।
संसाधयेत् क्रियायान्तु तान् जह्यात् सारवर्जितान्[1] ।।१५०

पक्षद्वयं साधयेद्या ताञ्जह्यात् दूरतः क्रियाम् ।
क्रियां बलवतीमुक्त्वा दुर्बलं योऽवलम्बते ।
स जयेऽवधृते सभ्यैः पुनस्तान्नाप्नुयात् क्रियाम् ।।१५१

प्रपद्य कारणं पूर्वमन्यद्गुरुतरं यदि ।
प्रतिवाक्यगतं ब्रूयात् साध्यते तद्धि नेतरत् ।।१५२

मिथ्योक्तौ स चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा[2] ।
प्राङ्न्याये च स विज्ञेयो द्विपात्सम्प्रतिपत्तिषु ।।१५३

अथ प्रमाणानि १५४-१७०

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं विदुः ।
लेशोद्देशस्तु युक्तिः स्यात् दिव्यानीह विषादयः ।।१५४

दिवाकृते कार्यविधौ ग्रामेषु नगरेषु च ।
सम्भवे साक्षिणां चैव दैवी न भवति क्रिया ।।१५५

यद्येकदेशव्याप्ताऽपि क्रिया विद्येत मानुषी ।
सा ग्राह्या न तु पूर्णाऽपि दैविकी वदतां नृणाम् ।।१५६

यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम् ।
मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः ।।१५७

प्रकान्ते साहसे वादे पारुष्ये दण्डवाचिके ।
बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेव वा ।।१५८

---

(1) Sm.Ch.p.116, Vir.M.p.107-8. (2) Vir.M.p.108-9, Sm.Ch.p.116-20.

In Public domain. Digitization Muthulakshmi Research Academy

गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षणम्[1]।
युक्तिचिह्नेङ्गिताकारवाक्चक्षुश्चेष्टितैर्नृणाम् ॥१५९

उत्तमेषु च सर्वेषु साहसेषु विचारयेत् ।
सद्भावं दिव्यदृष्टेन सत्सु साक्षिषु वै भृगुः ॥१६०

ऋणे लेख्यं साक्षिणो वा युक्तिलेशादयोऽपि वा ।
दैविको वा क्रिया प्रोक्ता प्रजानां हितकाम्यया ॥१६१

प्रमाणै र्हेतुना वाऽपि दिव्येनैव तु निश्चयम् ।
सर्वेष्वेव विवादेषु सदा कुर्यान्नराधिपः ॥
सर्वाभावे तु यत्नेन नान्यथैव कदाचन ॥१६२

समत्वं साक्षिणां यत्र दिव्यैस्तत्रापि शोधयेत् ।
प्राणान्तिकविवादे वा विद्यमानेषु साक्षिषु ॥१६३
दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणम्॥१७४

यत्र स्यात् सोपधं लेख्यं तद्राज्ञः श्रावितं यदि।
दिव्येन शोधयेत्तत्र राजा धर्मासनस्थितः॥१६५

पूगश्रेणीगणादीनां या स्थितिः परिकीर्त्तिता ।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः ॥१६६

द्वारमार्गक्रियाभोगजलवाहादिके तथा ।
भुक्तिरेव हि गुर्वी स्यान्न लेख्यं न च साक्षिणः ॥१६७

दत्तादत्तेऽथ भृत्यानां स्वामिना निर्णये सति ।
विक्रयादानसम्बन्धे क्रीत्वा धनमयच्छति ॥१६८

द्यूते समाह्वये चैव विवादे समुपस्थिते ।
साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम् ॥१६९

अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ।
दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत् ॥१७०

(1) Vir.M.p.110 to 116, Sm.Ch.p.112 to 120.

In Public domain. Digitization Muthulakshmi Research Academy

अथ लेख्यम्। १७१-१८३

अर्थिप्रत्यर्थिवाक्यानि प्रतिज्ञा साक्षिवाक्तथा ।
निर्णयश्च यथा तस्य यथा चावधृतं स्वयम् ।।१७१

एतद्यथाक्षरं लेख्ये यथापूर्वं निवेशयेत् ।
अभियोक्त्रभियुक्तानां वचनं प्राङ्निवेशयेत् ।।१७२

सभ्यानां प्राड्विवाकस्य कुलानां वा ततः परम् ।
निश्चयं स्मृतिशास्त्रस्य मतं तत्रैव लेखयेत् ।।१७३

सर्वे जानपदान् वर्णान् लेख्ये तु विनिवेशयेत् ।
सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम् ।
लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः ।।१७४

सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः ।
यथा लेख्यविधौ तद्वत् स्वहस्तं तत्र दापयेत् ।।१७५

अनेन विधिना लेख्यं पश्चात्कारं विदुर्बुधाः ।
निरस्ता तु क्रिया यत्र प्रमाणेनैव वादिना ।
पश्चात्कारो भवेत्तत्र न सर्वासु विधीयते ।।१७६

अन्यवाद्यादिहीनेभ्य इतरेषां प्रदीयते ।
वृत्तानुवादसंसिद्धन्तच्च स्याज्जयपत्रकम् ।।१७७

ग्राहकेण स्वहस्तेन लिखितं साक्षिवर्जितम् ।
स्वहस्तलेख्यं विज्ञेयं प्रमाणं तत्स्मृतं बुधैः ।। १७८

चातुर्विद्यपुरश्रेणीगणपौरादिकस्थितिः ।
तत् सिद्धार्थं तु यल्लेख्यं तद्भवेत् स्थितिपत्रकम् ।।१७९

अभिशापे समुत्तीर्णे प्रायश्चित्ते कृते जनैः ।
विशुद्धिपत्रकं ज्ञेयं तेभ्यः साक्षिसमन्वितम् ।।१८०

In Public domain. Digitization Muthulakshmi Research Academy

उत्तमेषु समस्तेषु अभिशापे समागमे ।
वृत्तानुवादलेख्यं यत् तज्ज्ञेयं सन्धिपत्रकम् ।।१८१
सीमाविवादे निर्णीते सीमापत्रं विधीयते ।।१८२
मलैर्यद् भेदितं दग्धं छिद्रितं वीतमेव वा ।
तदन्यत्कारयेल्लेख्यं स्वेदेनोल्लिखितं तथा ।।१८३

लेख्यपरीक्षा १८४-२२१

राजा क्रियां समाहूय यथान्यायं विचारयेत् ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ।।१८४
देशाचारयुतं वर्षमासपक्षादिवृद्धिमत् ।
ऋणिसाक्षिलेखकानां हस्ताङ्कं लेख्यमुच्यते ।।१८५
वर्णवाक्यक्रियायुक्तमसंदिग्धं स्फुटाक्षरम् ।
अहीनक्रमचिह्नं च लेख्यं तत्सिद्धिमाप्नुयात् ।।१८६
स्थानभ्रष्टास्त्वपङ्क्तिस्थाः संदिग्धा लक्षणच्युताः ।
यदा तु संस्थिता वर्णाः कूटलेख्यं तदा भवेत् ।।१८७
देशाचारविरुद्धं यत्संदिग्धं क्रमवर्जितम् ।
कृतं च स्वामिना यच्च साध्यहीनं च दुष्यति ।।१८८
मत्तेनोपाधिभीतेन तथोन्मत्तेन पीडितैः ।
स्त्रीभिर्बालास्वतन्त्रैश्च कृतं लेख्यं न सिद्ध्यति ।।१८९
साक्षिदोषाद्भवेद्दुष्टं पत्रं वै लेखकस्य वा ।
धनिकस्यापि वा दोषात्तथा धारणकस्य वा ।।१९०
प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना ।
गूढास्तु प्रकटाः सभ्यैः काले शास्त्रप्रदर्शनात् ।।१९१
साक्षिलेखककर्त्तारः कूटतां यान्ति ते तथा ।
तथा दोषाः प्रयोक्तव्या दुष्टैर्लेख्यं प्रदुष्यति ।।१९२

In Public domain. Digitization Muthulakshmi Research Academy

न लेखकेन लिखितं न दृष्टं साक्षिभिस्तथा ।
एवं प्रत्यर्थिनोक्ते तु कूटलेख्यं प्रकीर्त्तितम् ॥१९३

नातथ्येन प्रमाणं तु दोषेणैव तु दूषयेत् ।
मिथ्याभियोगे दण्ड्यस्स्यात् साध्यार्थाच्चापि हीयते ॥१९४

एवं दुष्टं नृपस्थाने यस्मिन् तद्धि विचार्यते ।
विमृश्य ब्राह्मणैस्सार्थं पत्रदोषान्निरूपयेत् ॥१९५

येन ते कूटतां यान्ति साक्षिलेखककारकाः ।
तेन दुष्टं भवेल्लेख्यं शुद्धैश्शुद्धिं विनिर्दिशेत् ॥१९६

धनिकेन स्वहस्तेन लिखितं साक्षिवर्जितम् ।
भवेत् कूटं न चेत् कर्त्ता कृतं हीति विभावयेत् ॥१९७

त्रिविधस्यापि लेखस्य भ्रान्तिः सञ्जायते नृणाम् ।
ऋणिसाक्षिलेखकानां हस्तोक्त्या साधयेत्ततः ॥१९८

दत्तं लेख्ये स्वहस्तं तु ऋणिको यदि निह्नुते ।
पत्रस्थैस्साक्षिभिर्वाच्यो लेखकस्य मतेन वा ॥१९९

कृताकृतविवादेषु साक्षिभिः पत्रनिर्णयः।
दूषिते पत्रके वादी तदारूढांस्तु निर्दिशेत् ॥२००

प्रत्यक्षमनुमानेन न कदाचित् प्रबाध्यते ।
तस्माल्लेख्यस्य दुष्टस्य वचोभिस्साक्षिणां भवेत् ।
निर्णयः स्वधनार्थं हि पत्रं दूषयति स्वयम् ॥२०१

ऋणी स्वहस्तसन्देहे जीवतो वा मृतस्य वा ।
तत् स्वहस्तकृतैरन्यैः पत्रैस्तल्लेख्यनिर्णयः ॥२०२

अथ पञ्चत्वमापन्नो लेखकस्सह साक्षिभिः ।
तत्स्वहस्तादिभिस्तेषां विशुद्धिः स्यान्न संशयः ॥२०२

In Public domain. Digitization Muthulakshmi Research Academy

पश्चात्कारनिबद्धं यत्तद्यत्नेन विचारयेत् ।
यदि स्याद् युक्तियुक्तं तु प्रमाणं लिखितं तदा ॥२०४

अन्यथा दूरतः कार्यं पुनरेव विनिर्णयेत् ।
अतथ्यं तथ्यभावेन स्थापितं ज्ञानविभ्रमात् ॥२०५

निवर्त्यं तत्प्रमाणं स्यात् यत्नेनापि कृतं नृपैः ।
समुद्रे तु यथा लेख्ये मृतास्सर्वेऽपि तत्स्थिताः ॥
लिखितं तत्प्रमाणं तु मृतेष्वपि हि तेषु वै ॥२०६

मुद्राशुद्धं क्रियाशुद्धं भुक्तिशुद्धं सचिह्नकम् ।
राज्ञः स्वहस्तसंशुद्धं शुद्धिमायाति शासनम् ॥२०७

शक्तस्य सन्निधावर्थो येन लेख्येन भुज्यते ।
वर्षाणि विंशतिं यावत्तत् पत्रं दोषवर्जितम् ॥२०८

दृष्टे पत्रे स्फुटन्दोषान्नोक्तवानृणिको यदि ।
ततो विंशतिवर्षाणि स्थितं पत्रं स्थिरम्भवेत् ॥२०९

अथ विंशतिवर्षानि आधिर्भुक्तः सुनिश्चितः ।
तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिताः॥२१०

सीमाविवादे निर्णीते सीमापत्रं विधीयते ।
तस्य दोषाः प्रवक्तव्या यावद्दर्शानि विंशतिम् ॥२११

प्राप्तं वा तेन ते किञ्चिद् देयं वाथ निरूपितम् ।
विनापि मुद्रया लेख्यं प्रमाणं मृतसाक्षिकम् ॥२१२

दर्पणस्थ यथा विम्बमसत्सदिव दृश्यते ।
तथा लेख्यस्य विम्बानि कुर्वन्ति कुशलाः जनाः॰॥२१३

कूटोक्तौ साक्षिणां वाक्यं लेखकस्य च पत्रकम्।
नयेच्छुद्धिं न यः कूटं स दाप्यो दण्डमुत्तमम्॥२१४

In Public domain. Digitization Muthulakshmi Research Academy

स्थावरे विक्रयाधाने लेख्यं कूटं करोति यः ।
स सम्यग्भावितः कार्यो जिह्वापाण्यङ्घ्रिवर्जितः ॥२१५

न दिव्यैः साक्षिभिर्वापि हीयते लिखितं क्वचित् ।
लेख्यधर्मः सदा श्रेष्ठो ह्यतो नान्येन हीयते ॥२१६

तद्युक्तप्रतिलेख्येन तद्विशिष्टेन वा सदा ।
लेख्यक्रिया निरस्येत निरस्यान्येन न क्वचित् ॥२१७

लेख्यं त्रिंशत्समातीतमदृष्टाश्रावितं च यत् ।
न तत् सिद्धिमवाप्नोति तिष्ठत्स्वपि हि साक्षिषु ॥२१८

प्रयुक्ते शान्तलाभे तु लिखितं यो न दर्शयेत् ।
न याचते च ऋणिकं तत्संदिग्धत्वमाप्नुयात् ॥२१९

द्रव्यं गृहीत्वा यल्लेख्यं परस्मै सम्प्रदीयते ।
छन्नमन्येन चारूढं संयतं चान्यवेश्मनि ॥२२०

दत्ते वृत्तेऽथवा द्रव्ये क्वचिल्लिखितपूर्वके ।
एष एव विधिर्ज्ञेयो लेख्यशुद्धिविनिर्णये ॥२२१

भुक्तिनिरूपणम् २२२-२३२

लिखितं साक्षिणो भुक्तिः प्रमाणत्रयमिष्यते ।
प्रमाणेषु स्मृता भुक्तेस्तल्लेख्यसमता नृणाम् ॥२२२

रथ्यानिर्गमनद्वारजलवाहादिसंशये ।
भुक्तिरेव तु गुर्वी स्यात् प्रमाणेष्विति निश्चयः ॥२२३

नोपभोगबलं कार्यमाहर्त्ता तत्सुतेन वा ।
पशुस्त्रीपुरुषादीनामिति धर्मो व्यवस्थितः ॥२२४

न भोगं कल्पयेत् स्त्रीषु देवराजधनेषु च ।
बालश्रोत्रियवित्ते च मातृतः पितृतः क्रमात् ॥२२५

In Public domain. Digitization Muthulakshmi Research Academy

प्रनष्टागमलेख्येन भोगारूढेन वादिना ।
कालः प्रमाणं दानं च कीर्त्तनीयानि संसदि ॥२२६

भुक्तिस्तु द्विविधा प्रोक्ता सागमाऽनागमा तथा ।
त्रिपुरुषी या स्वतन्त्राऽनागमाऽल्पा तु सागमा ॥२२७

स्मार्ते काले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्त्तेऽनुगमाभावात् क्रमात्त्रिपुरुषागता ॥२२८

आहर्ता भुक्तियुक्तोऽपि लेख्यदोषान्विशोधयेत् ।
तत्सुतो भुक्तिदोषांस्तु लेख्यदोषांस्तु नाप्नुयात् ॥२२९

मुख्या पैतामही भुक्तिः पैतृकी वापि सम्मता ।
वयोऽपेतैरवच्छिन्ना स्थिरा षष्ट्याब्दिका मता ॥२३०

चिरन्तनमविज्ञातं भोगं लोभान्न चालयेत् ॥२३१

स्वजातिभिर्बान्धवैश्च भुक्तं यत् स्वजनैस्तथा ।
भोगात्तत्र तु सिद्धिः स्यात् भोगमन्येषु कल्पयेत् ॥२३२

अथ युक्तिः। २३३-२३५

अर्थिनाभ्यर्थितो यस्तु विघातन्न प्रयोजयेत् ।
त्रिचतुः पञ्चकृत्वो वा परतस्तदृणी भवेत् ॥२३३

दानं प्रज्ञापनाभेदः सम्प्रलोभक्रिया च या ।
चित्तापनयनञ्चैव हेतवो हि विभावकाः ॥२३४

एषामन्यतमो यत्र वादिना भावितो भवेत् ।
मूलक्रिया तु तन्न स्याद्भावितो वादिनिह्नवे ॥२३५

अथ साक्षिणः साक्षिभेदाः। २३६-२५७

अर्थिप्रत्यर्थिसान्निध्यादनुभूतन्तु यद्भवेत् ।
तदग्राह्यं साक्षिणो वाक्यमन्यथा न बृहस्पतिः ॥२३६

In Public domain. Digitization Muthulakshmi Research Academy

अर्थिना स्वयमानीतो यो लेख्ये सन्निवेश्यते ।
स साक्षी लिखितो नाम स्मारितः पत्रकादृते ।।२३७

यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः ।
स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते ।।२३८

प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः ।
द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ ।।२३९

अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्राव्यते स्थितो गूढोऽगूढसाक्षी स उच्यते ।।२४०

साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते ।
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः[1] ।।२४१

अभ्यन्तरस्तु निक्षेपे साक्ष्यमेकोऽपि वाच्यते* ।
अर्थिना प्रहितस्साक्षी भवत्येकोऽपि दूतकः ।।२४२

+संस्तुतं येन संन्यस्तं तत् तेनैव विभावयेत् ।
एक एव प्रमाणं स विवादे तत्र कीर्त्तितः[2] ।।२४३

व्याघातेषु नृपाज्ञायाः सङ्ग्रहे साहसेषु च ।
स्तेयपारुष्ययोश्चैव न परीक्षेत साक्षिणः ।।२४४

ऋणादिषु परीक्षेत साक्षिणस्स्थिरकर्मसु ।
साहसान्यायिके चैव परीक्षा कुत्रचित् स्मृता[3] ।।२४५

विभाव्यो वादिना यादृक् सदृशैर्विभावयेत् ।
नोत्कृष्टाश्चापकृष्टास्तु साक्षिभिर्भावयेत् ।।२४६

प्रख्यातकुलशीलाश्च लोभमोहविवर्जिताः ।
आप्ताः शिष्टाः विबुद्धा ये तेषां वाक्यमसंशयम् ।।२४७

(1) Vir.M.p.143. (2) Vir.m.p.151, Sm.Ch.p.175. (3) Sm.Ch.p.183.

* याच्यते इति वीरमित्रोदय धृतपाठान्तरम्। + संस्कृतं येन यत् पण्य तत्तेन व विभावयेत् इति वीरमित्रोदये पाठभेद उपलभ्यते।

In Public domain. Digitization: Muthulakshmi Research Academy

तद्वृत्तिजीविनो ये च तत्सेवाहितकारिणः ।
तद्बन्धुसुहृदो भृत्या आप्तास्ते तु न साक्षिणः ॥२४८

कुल्याः सम्बन्धिनश्चैव विवाह्यो भगिनीपतिः ।
पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा ॥२४९

मातृष्वसृसुताश्चैव सोदर्यासुतमातुलाः ।
एते सनाभयः प्रोक्ताः साक्ष्यन्तेषु न योजयेत् ॥२५०

नगरग्रामदेशेषु नियुक्ता ये पदेषु च ।
वल्लभाश्च न पृच्छेयुर्भक्तास्ते राजपुरुषाः[1] ॥२५१

लिङ्गिनः श्रेणिपूगाश्च वणिग्व्रातास्तथापरे ।
समूहस्याश्च ये चान्ये वर्गास्तानब्रवीद्भृगुः ॥२५२

दासचारणमल्लानां हस्त्यश्वायुधजीविनाम् ।
प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः ॥२५३

तेषां वादः स्ववर्गेषु वर्गिणस्तेषु साक्षिणः[2] ।
लेख्यारूढश्चोत्तरश्च साक्षी मार्गद्वयान्वितः ॥२५४

अथ स्वहस्तेनारूढस्तिष्ठंश्चैकः स एव तु ।
न चेत् प्रत्यभिजानीयात् तत् स्वहस्तैः प्रसाधयेत्[3] ॥२५५

साक्षिणां लिखितानां तु निर्दिष्टानां च वादिना ।
तेषामेकोऽन्यथावादी भेदात्सर्वे न साक्षिणः[4] ॥२५६

अन्येन हि कृतस्साक्षी नेवान्यस्तं विवादयेत् ।
तदभावे नियुक्तो वा बान्धवो वा विवादयेत्[5] ॥२५७

साक्ष्युद्भावनम् २५८-२६१

प्रमाणस्य हि ये दोषा वक्तव्यास्ते विवादिना ।
गूढास्तु प्रकटाः सभ्यैः काले शास्त्रप्रदर्शनात् ॥२५८

---

(1) Sm.Ch.p.174- 180, Vir.M.p.149,160. (2) Vir.M.p.149, (3) Vir.M.p.147. (4) Sm.Ch.p.149. (5) Sm.Ch.p.180.

In Public domain. Digitization Muthulakshmi Research Academy

लेख्यदोषास्तु ये केचित् साक्षिणां चैव ये स्मृताः ।
वादकाले तु वक्तव्याः पश्चादुक्तान्न दूषयेत् ॥२५९

उक्तेऽर्थे साक्षिणो यस्तु दूषयेत् प्रागदूषितान् ।
न च तत्कारणं ब्रूयात् प्राप्नुयात् पूर्वसाहसम् ॥२६०

नातथ्येन प्रमाणं तु दोषेणैव तु दूषयेत् ।
मिथ्याभियोगे दण्डस्स्यात् साध्यार्थाच्चापि हीयते[1] ॥२६१

साक्ष्यवादविधिः। २६२-२७६

उपस्थितान् परीक्षेत साक्षिणो नृपतिः स्वयम् ॥२६२

सभान्तस्थैस्तु वक्तव्यं साक्ष्यं नान्यत्र साक्षिभिः ।
सर्वसाक्ष्येष्वयं धर्मो ह्यन्यत्र स्थावरेषु तु ॥२६३

देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेद्दते द्विजान् ।
उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वा शुचिः शुचीन् ॥२६४

सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन् ॥२६५

यद्द्वयोरनयोर्वेत्थं कार्येस्मिंश्चेष्टितं मिथः ।
तद्ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता[2] ॥२६६

अर्थिप्रत्यर्थिसान्निध्ये साध्यार्थस्य च सन्निधौ ।
प्रत्यक्षं वादयेत् साक्ष्यं न परोक्षे कदाचन ॥२६७

अर्थस्योपरि वक्तव्यं तयोरपि विना क्वचित् ।
चतुष्पदेष्वयं धर्मो द्विपदस्थावरेषु च ॥२६८

वधे चेत् प्राणिनां साक्ष्यं वादयेच्छिवसन्निधौ * ।
तदभावे तु चिह्नस्य नान्यथैव प्रवादयेत् ॥२६९

---

(1) Sm.Ch.p.192, Vir.M.p.163-164. (2) Sm.Ch.p.206, M.165-137.

* शवसन्निधौ इति पाठान्तरं वीरमित्रोदये ।

In Public domain. Digitization Muthulakshmi Research Academy

तौलङ्गणिममानार्हमभावेऽपि हि वादयेत् ।
क्रियाकारकेषु सर्वेषु साक्षित्वं न त्वतोऽन्यथा ॥२७०

स्वभावोक्त वचस्तेषां ग्राह्यं यद्दोषवर्जितम् ।
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनः ॥२७१

स्वभावेनैव यद्ब्रूयुस्तद्ग्राह्यं व्यावहारिकम् ।
अतो यदन्यद्विब्रूयुर्धर्मार्थं तदपार्थकम् ॥२७२

ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम् ।
ऊने वाऽप्यधिके वाऽर्थे प्रोक्ते साध्यं न सिध्यति ॥२७३

साध्यार्थांशेऽपि गदिते साक्षिभिस्सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्ये यत्साध्यं परिकल्पितम् ॥२७४

ऊनाधिकं तु यत्र स्यात् तत्साक्ष्यं तत्र वर्जयेत् ।
साक्षी तत्र न दण्ड्यस्स्यादब्रुवन् दण्डमर्हति ॥२७५

देशं कालं धनं संख्यां रूपं जात्याकृती वयः ।
विसंवदेद्यत्र साक्ष्ये तदनुक्तं विदुर्बुधाः[1] ॥२७६

साक्ष्यदोषाः दण्डाश्च। २७७-२८७

यः साक्षी नैव निर्दिष्टो नाहूतो नैव दर्शितः ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः ॥२७७

अपृष्टः सर्ववचने पृष्टस्याकथने तथा ।
साक्षिणः सन्निरोद्धव्याः गर्ह्या दण्ड्याश्च धर्मतः ॥२७८

वाक्पारुष्ये छले वादे दाप्याः स्युस्त्रिशतं दमम् ।
ऋणादिवादेषु धनं ते स्युर्दाप्या ऋणं यथा ॥२७९

साक्षी साक्ष्यं न चेद् ब्रूयात् समदण्डं वहेदृणम् ।
अतोऽन्येषु विवादेषु त्रिशतं दण्डमर्हति ॥२८०

(1) Sm.Ch.pp.206-289. Vir.M.167-168.

In Public domain. Digitization Muthulakshmi Research Academy

सम्यक् क्रियापरिज्ञाने देयः कालस्तु साक्षिणम् ।
सन्दिग्धं यत्र साक्ष्यं तु सद्यः स्पष्टं विवादयेत् ॥२८१

न कालहरणं कार्यं राज्ञा साक्षिप्रभाषणे ।
महान् दोषो भवेत् कालाद्धर्मव्यावृत्तिलक्षणः ॥२८२

उक्त्वाऽन्यथा ब्रुवाणाश्च दण्ड्यास्स्युर्वाक्छलान्विताः ॥२८३

येन कार्यस्य लोभेन निर्दिष्टाः कूटसाक्षिणः ।
गृहीत्वा तस्य सर्वस्वं कुर्यान्निर्विषयं ततः ॥२८४

यत्र वै भावितं कार्यं साक्षिभिर्वादिना भवेत् ।
प्रतिवादी यदा तत्र भावयेत् कार्यमन्यथा ॥२८५

बहुभिश्च कुलीनैर्वा पूर्वास्स्युः कूटसाक्षिणः ।
न चैकस्मिन् विवादे तु क्रिया स्याद्वादिनोर्द्वयोः ॥२८६

यदा शुद्धा क्रिया न्यायात्तदा तद्वाक्यशोधनम् ।
शुद्धाश्च वाक्याद्यः शुद्धः शुद्धोऽर्थः इति संस्थितिः[1]॥२८७

दिव्यव्यवस्था। २८८-२९९

न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥२८८

पार्थिवैश्शङ्कितानान्तु निर्दिष्टानां च दस्युभिः ।
आत्मशुद्धिपराणाञ्च दिव्यं देयं शिरो विना ॥२८९

पार्थिवैश्शङ्कितानां तु तुलादीनि नियोजयेत् ।
आत्मशुद्धिविधाने च न शिरस्तत्र कल्पयेत् ॥२९०

लोकापवाददुष्टानां शङ्कितानां च दस्युभिः ।
तुलादीनि नियोज्यानि न शिरस्तत्र वै भृगुः ॥२९१

न शङ्कासु शिरः कोशे कल्पयेत्तु कदाचन ॥२९२

(1) Sm.Ch.pp.212-218, Vir.M.p.168-174.

In Public domain. Digitization Muthulakshmi Research Academy

शङ्काविश्वाससंधाने विभागे रिक्थिनां सदा ।
क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् ॥२९३

दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत् ।
स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् ॥२९४

सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत् ।
हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत् ॥२९५

ज्ञात्वा संख्यां सुवर्णस्य शतनाशे विषं स्मृतम् ।
अशीतेस्तु विनाशे वै दद्याच्चैव हुताशनम् ॥२९६

षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् ।
विंशद्दशविनाशे तु कोशपानं विधीयते ॥२९७

पञ्चाधिकस्य वै नाशे तदर्धार्धस्य तण्डुलाः ।
तदर्धार्धविनाशे तु स्पृशेत् पुत्रादिमस्तकम् ॥२९८

तदर्धार्धविनाशे तु लौकिकाश्च क्रियास्मृताः ।
एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते ॥२९९

विवादिजात्यादितो व्यवस्था। ३००-३१२

सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे ॥३००

न लोहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम् ।
मन्त्रयोगविदां चैव विषं दद्यात्तु न क्वचित् ।
तण्डुलैर्न नियुञ्जीत प्राणिनं मुखरोगिणम् ॥३०१

गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् ।
प्रेष्यान्वार्द्धुषिकांश्चैव ग्राहयेच्छूद्रवद्द्विजान् ॥३०२

मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥३०३

In Public domain. Digitization Muthulakshmi Research Academy

लिङ्गिनां प्रमदानां तु मन्त्रयोगक्रियाविदाम् ।
वर्णसङ्करजातानां पापाभ्यासप्रवर्त्तिनाम् ॥३०४

एतेष्वेवाभियोगेषु निन्द्येष्वेव च यत्नतः ।
दिव्यं प्रकल्पयेन्नैव राजा धर्मपरायणः ॥३०५

एतैरेव नियुक्तानां साधूनां दिव्यमर्हति ।
नेच्छन्ति साधवो यत्र तत्र शोध्यः स्वकैर्नरैः ॥३०६

महापातकयुक्तेषु नास्तिकेषु विशेषतः ।
न देयं तेषु दिव्यन्तु पापाभ्यासरते भृगुः ॥३०७

येषु पापेषु दिव्यानि कर्त्तव्यानि प्रयत्नतः ।
तारयेत् सज्जनैस्तानि नाभिशस्तं त्यजेन्नरः ॥३०८

एषु वादेषु दिव्यानि प्रतिषिद्धानि यत्नतः ।
कारयेत् स्वजनैस्तानि नाभिशप्तं त्यजेन्मनुः ॥३०९

अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् ।
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ॥३१०

तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेत् ।३११

कालदेशविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्ययः ॥३१२

दिव्यदेशाः। ३१३-३१५

इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् ।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥३१३

प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ।
अतोऽन्येषु तु कार्येषु सभामध्ये विदुर्बुधाः ॥३१४

अदेशकालदत्तानि बहिर्वासकृतानि च ।
व्यभिचारसदार्थेषु कुर्वन्तीह न संशयः ॥३१५

In Public domain. Digitization Muthulakshmi Research Academy

दिव्यप्रयोगे उदकविधिः। ३१६-३१७

शरांश्चानायसाग्रांस्तु प्रकुर्वीत विशुद्धये ।
वैणुकाण्डमयांश्चैव क्षेप्ता तु सुदृढं क्षिपेत् ॥
क्षिप्तेषु मज्जनं कार्यं गमनं समकालिकम् ॥३१६

शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिका ।
अप्सु प्रवेशने यस्य शुद्धन्तमपि निर्दिशेत् ॥३१७

विषविधिः। ३१८-३२२

वत्सनाभनिभस्पीतं वर्णज्ञानेन निश्चितम् ।
शुक्तिशृङ्गाकृत्तिभङ्गे विद्यात् तद्वत्सनाभकम् ॥३१८

मकक्षीरसमायुक्तं स्वच्छं कुर्वीत तत् क्षणात् ।
बाह्यमेवं समाख्यातं लक्षणं धर्मसाधकैः ॥३१९

अजाशृङ्गनिभं श्यामं सुपीतं शृङ्गसम्भवम् ।
भृङ्गे च शृङ्गवेराभं ख्यातन्तच्छार्ङ्गिणं विषम् ॥३२०

रक्तस्थमसितं कुर्यात् कठिनञ्चैव तत्क्षणात् ।
अनेन विधिना ज्ञेयं विषं दिव्यविशारदैः ॥३२१

पूर्वाह्णे शीतले देशे विषन्देयन्तु देहिनाम् ।
विषेण योजितं श्लक्ष्णम्पिष्टन्त्रिंशद्गुणान्वितम् ॥३२२

अथाग्निविधिः। ३२३

प्रस्खलत्यभियुक्तश्चेत् स्थानादन्यत्र दह्यते ।
अदग्धं तं विदुर्देवास्तस्य भूयोऽपि दापयेत् ॥३२३

घटारोपणविधिः। ३२४

शिक्यच्छेदे तुलाभङ्गे तथापि तु गणस्य वा ।
शुद्धेस्तु संशये चैव परीक्षेत पुनर्नरम् ॥३२४

In Public domain. Digitization Muthulakshmi Research Academy

कोशविधिः। ३२५-३२८

स्वल्पापराधे देवानां पाययित्वाऽऽयुधोदकम् ।
पाय्यो विकारे चाशुद्धो नियम्यः शुचिरन्यथा ॥३२५

देवतास्नानपानीयं दिग्धतण्डुलभक्षणे ।
प्रभाते कारिणे देया आदित्यादिमुखाय तु ॥३२६

अथ दैवविसंवादः त्रिसप्ताहात्तु दापयेत् ।
अभियुक्तं प्रयत्नेन तमर्थं दण्डमेव च ॥३२७

क्षयातिसारविस्फोटस्ताल्वस्थिपरिपीडनम् ।
नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते ॥
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम् ॥३२८

अथ शपथविधिः। ३२९-३३१

यत्रोपदिश्यते कर्म कर्त्तुरङ्गं न तूच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ॥३२९

आचतुर्दशकादह्नो यस्य नीराजदैविकम् ।
व्यसनञ्जायते घोरं स ज्ञेयः शपथे शुचिः ॥३३०

समिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च ।
न चार्त्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ॥३३१

निर्णयादिकृत्यम् । ३३२-३३८

सर्वापलापं यः कृत्वा मिथोऽल्पमपि संवदेत् ।
सर्वमेव तु दाप्यः स्यादभियुक्तो बृहस्पतिः॥३३२

अनेकार्थाभियोगेऽपि यावत् संसाधयेद्धनी ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ॥३३३

सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम् ।
लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः ॥३३४

In Public domain. Digitization Muthulakshmi Research Academy

राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् ।
देशाचारेण चान्यांस्तु दुष्टान् संपीड्य दापयेत् ॥३३५

रिकूथिनं सुहृदं वाऽपि छलेनैव प्रदापयेत् ।
शतार्धं दापयेत् शुद्धमशुद्धो दण्डभाग् भवेत् ॥३३६

विषे तोये हुताशे च तुलाकोशे च तण्डुले ।
तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत् ॥३३७

सहस्रं षट्शतं चैव तथा पञ्चशतानि तु ।
चतुस्त्रिद्ध्येकमेवं च हीनं हीनेषु कल्पयेत् ॥३३८

अथ दण्डविधयः ३३९-३५०

एवं धर्मासनस्थेन समेनैव विवादिना ।
कार्याणां निर्णयो दृश्यो ब्राह्मणैः सह नान्यथा ॥३३९

धनदानासहं बुध्वा स्वाधीनं कर्म कारयेत् ।
अशक्तौ बन्धनागारं प्रवेश्यो ब्राह्मणादृते ॥३४०

आचार्यस्य पितुर्मातुर्बान्धवानां तथैव च ।
एतेषामपराधेषु दण्डो नैव विधीयते ॥३४१

प्राणात्यये तु यत्र स्यादकार्यकरणं कृतम् ।
दण्डस्तत्र तु नैव स्यादेष धर्मो भृगुः स्मृतः ॥३४२

येन दोषेण शूद्रस्य दण्डो भवति धर्मतः ।
तेन चेत् क्षत्रविप्राणां द्विगुणो द्विगुणो भवेत् ॥३४३

प्रव्रज्यावसितं शूद्रं जपहोमपरायणम् ।
वधेन शासयेत् पापं दण्ड्यो वा द्विगुणं दमम् ॥३४४

माषपादो द्विपादो वा दण्डो यत्र प्रवर्त्तितः ।
अनिर्द्दिष्टं तु विज्ञेयं माषकं तत्र कल्पयेत् ॥३४५

In Public domain. Digitization Muthulakshmi Research Academy

कल्पितो यस्य यो दण्डस्त्वपराधानुसारतः ।
पणानां ग्रहणं तु स्यात् तन्मूल्यं वाऽथ राजनि ॥३४६

यत्रोक्तो माषकैर्दण्डो राजतं तत्र निर्दिशेत् ।
कृष्णलैश्चोक्तमेव स्यादुक्तदण्डविनिश्चयः ॥३४७

माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु ।
काकणी तु चतुर्भागा माषकस्य पणस्य च ॥
पञ्चनद्यां प्रदेशे तु संज्ञेयं व्यावहारिकी ॥३४८

कार्षापणोऽन्तिका ज्ञेया स्ताश्चतस्रस्तु धानकः ।
ते द्वादश सुवर्णास्तु दीनारश्चित्रकः स्मृतः ॥३४९

शुद्धिस्तु शास्त्रतत्त्वज्ञैश्चिकित्सा समुदाहृता ।
प्रायश्चित्तं च दण्डं च ताभ्यां सा द्विविधा स्मृता ॥३५०

अथ कृतनिवर्तनम्। ३५१-३५८

उन्मत्तेनैव मत्तेन तथा भावान्तरेण वा ।
यद्दत्तं यत्कृतं वाऽथ प्रमाणं नैव तद्भवेत् ॥३५१

अस्वतन्त्रकृतं कार्यं तस्य स्वामी निवर्तयेत् ।
न भर्त्ता विवदेतान्यो भीतोन्मत्तकृतादृते ॥३५२

न क्षेत्रगृहदासानां दानाधमनविक्रयाः ।
अस्वतन्त्रकृतास्सिद्धिं प्राप्नुयुर्नानुवर्णिताः ॥३५३

प्रमाणं सर्व एवैते पण्यानां क्रयविक्रये ।
यदि संव्यवहारं ते कुर्वन्तोऽप्यनुमोदिताः ॥३५४

क्षेत्रादीनां तथैव स्युः भ्राता भ्रातृसुतस्सुतः ।
निसृष्टाः कृत्यकरणे गुरुणा यदि गच्छता[1] ॥३५५

---

(1) Sm.Ch.p.305-7.

In Public domain. Digitization Muthulakshmi Research Academy

निसृष्टार्थस्तु यो यस्मिन् तस्मिन्नर्थे प्रभुस्तु सः ।
तद्धर्त्ता तत्कृतं कार्यं नान्यथा कर्त्तुमर्हति ।।३५६

पिता स्वतन्त्रः पितृमान् भ्राता भ्रातृव्य एव च ।
कनिष्ठो वा ऽविभक्तस्थो दासः कर्मकरस्तथा ।।३५७

सुतस्य सुतदाराणां वशित्वं त्वनुशासने ।
विक्रये चैव दाने च वशित्वं न सुते पितुः[1] ।।३५८

अथ निर्णये विशेषविधिः ३५९-३६३

युक्तियुक्तन्तु कार्यं स्याद्दिव्यं यत्र विवर्जितम् ।
धर्मस्तु व्यवहारेण बाध्यते तत्र नान्यथा ।।३५९

प्रतिलोमप्रसूतेषु तथा दुर्गनिवासिषु ।
विरुद्धन्नियतं प्राहुस्तं धर्मं न विचालयेत् ।।३६०

निर्णयन्तु यदा कुर्यात्तेन धर्मेन पार्थिवः ।
व्यवहारश्चरित्रेण तदा तेनैव बाध्यते ।।३६१

विरुद्धं न्यायतो यत्तु चरित्रं कल्प्यते बुधैः ।
एवन्तत्र निरस्येत चरित्रं तु नृपाज्ञया ।।३६२

अनेन विधिना युक्तं बाधकं यद्यदुत्तरम् ।
अन्यथा बाधनं यत्र तत्र धर्मो विहन्यते[2] ।।३६३

अथ पुनर्न्यायः । ३६४

असत्सदिति यः पक्षः सभ्यैरेवावधार्यते ।
तीरितः सोऽनुशिष्टस्तु साक्षिवाक्यात् प्रकीर्त्तितः ।।३६४

पुनर्न्यायः ३६५

कुलादिभिर्निश्चितेऽपि सन्तोषं न गतस्तु यः ।
विचार्य तत् कृतं राजा कुकृतम् पुनरुद्धरेत् ।।३६५

(1) Sm.Ch.p.808-9, Vir.M.p.128. (2) Vir.M.p.120-21.

In Public domain. Digitization Muthulakshmi Research Academy

अथाष्टादशपदनिरूपणम् । ३६६-३७६

क्रयप्रोषितनिक्षिप्तबन्धान्वाहितयाचितम् ।
वैश्यवृत्त्यर्पितं चैव सोऽर्थस्तूपनिधिः स्मृतः ॥३६६

आधिक्यं न्यूनता चांशे अस्ति नास्तित्वमेव च ।
आभोगभुक्तिस्सीमा च षट् भूवादस्य हेतवः ॥३६७

यत्वसत्सङ्गितैरङ्गैः परमाक्षिपति क्वचित् ।
अभूतैर्वाऽथ भूतैर्वा निष्ठुरा वाक् स्मृता बुधैः ॥३६८

न्यग्भावकरणं वाचा क्रोधात्तु कुरुते यदा ।
वृत्तेर्देशकुलादीनामश्लीला सा बुधैः स्मृता ॥३६९

महापातकयोक्ती च रागद्वेषकरी च या ।
जातिभ्रंशकरी वाऽथ तीव्रा सा प्रथिता तु वाक् ॥३७०

हुङ्कारः कासनं चैव लोके यच्च विगर्हितम् ।
अनुकुर्यादनुब्रूयाद्वाक् पारुष्यं तथोच्यते ॥३७१

योऽगुणान् कीर्तयेत् क्रोधान्निर्गुणेर्वा गुणज्ञताम् ।
अन्यसंज्ञानुयोगी वा वाग्दुष्टं तं नरं विदुः ॥३७२

दूतोपचारयुक्तश्चेदवेलास्थानसंस्थितिः ।
कण्ठकेशाञ्चलग्राहः कर्णनासाकरादिषु ॥
एकस्थानासनाहाराः संग्रहो नवधा स्मृतः ॥३७३

परस्त्रियाऽभिभाषेत तीर्थेऽरण्ये गृहेऽपि वा ।
नदीनां चैव संभेदे स संग्रहणमाप्नुयात् ॥३७४

उपकारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सहखट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥३७५

स्त्रियं स्पृशेददेशेयः स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ॥३७६

In Public domain. Digitization Muthulakshmi Research Academy

अथ ऋणादाने ऋणप्रतिदातृनिर्णयः । ३७७-४२१

अनेकार्थाभियोगे च यावत् संसाधयेत् धनी ।
साक्षिभि स्तावदेवासौ लभते साधितं धनम् ॥३७७

पित्र्यभावे तु दातव्यमृणं पौत्रेण यत्नतः ।
चतुर्थेन यदादत्तं तस्मात् तद्धि निवर्तयेत् ॥३७८

विद्यमाने तु रोगार्ते स्वदेशात् प्रोषिते तथा ।
विंशात् संवत्सरांदेयमृणं पितृकृतं सुतैः ॥३७९

व्याधितोन्मत्तवृद्धानां तथा दीर्घप्रवासिनाम् ।
ऋणमेवंविधम् पुत्रान् जीवतामपि दापयेत् ॥३८०

एकच्छायाप्रविष्टानाम् दाप्यो यस्तत्र दृश्यते ।
प्रोषितस्स सुतः सर्वम् पित्रंशर्णं मृतस्य च ॥३८१

एकच्छायाश्रिते सर्वं दद्यात्तु प्रोषिते सुतः ।
मृते भर्त्तरि पित्र्यंशं परर्णं न बृहस्पतिः ॥३८२

यदृष्टम् दत्तशेषं वा देयं पैतामहन्तु तत् ।
सदोषव्याहृतं पित्रा नैव देयमृणं क्वचित् ॥३८३

पित्रा दृष्टमृणं यत्तुक्रमायातम् पितामहात् ।
निर्दोषं नोद्धृतं पुत्रैर्देयं पौत्रैस्तु तद्भृगुः ॥३८४

पैतामहन्तु यत् पुत्रैर्न दत्तं रोगिभिः स्थितैः ।
तत्स्यादेवम्विधं पौत्रैर्देयम् पैतामहं समम् ॥३८५

पुत्रेणापि समं देयम् ऋणं सर्वत्र तु पैतृकम् ॥३८६

नाप्राप्तव्यवहारैस्तु पितुर्युपरते क्वचित् ।
काले तु विधिना देयं वसेयुर्नरकेऽन्यथा ॥३८७

ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः ।
द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत्सुतम् ॥३८८

In Public domain. Digitization Muthulakshmi Research Academy

पित्रर्णे विद्यमाने तु न च पुत्रो धनं हरेत् ।
देयं तद्धनिने द्रव्यं मृते गृह्णंस्तु दाप्यते ॥३८९

कुटुम्बार्थमशक्तेन गृहीतं व्याधितेन वा ।
उपप्लवनिमित्तञ्च विद्यादापत्कृतन्तु तत् ॥३९०

कन्यावैवाहिकञ्चैव प्रेतकार्ये च यत्कृतम् ।
एतत्सर्वं प्रदातव्यम् कुटुम्बेन कृतं प्रभोः ॥३९१

प्रोषितस्यामतेनापि कुटुम्बार्थमृणं कृतम् ।
दासस्त्रीमातृशिष्यैर्वा दद्यात्पुत्रेण वा भृगुः ॥३९२

ऋणं पुत्रकृतं पित्रा न देयमिति धर्मतः ।
देयं प्रतिश्रुतं यस्मात् यच्च स्यादनुवर्णितम् ॥३९३

देयं पुत्रकृतं तत्स्यात् यच्च स्यादनुवर्णितम् ।
कृत्वा संवादितं यच्च श्रुत्वा चैवानुचोदितम् ॥३९४

देयं भार्याकृतमृणं भर्त्रा पुत्रेण मातृकम् ।
भक्तस्यार्थे कृतं यत् स्यादभिधाय गते दिशम् ॥३९५

न च भार्याकृतमृणं कथञ्चित् पत्युराभवेत् ।
आपत्कृतादृते पुंसः कुटुम्बार्थो हि दुस्तरः ॥३९६

भर्त्ता पुत्रेण वा सार्द्धं केवलेनात्मना कृतम् ।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया ॥३९७

भर्त्तुकामेन वा भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नापि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥३९८

निर्धनैरनपत्यैस्तु यत्कृतं शौण्डिकादिभिः ।
यः स्त्रीणामुपभोक्ता तु दद्यात्तदृणमेव हि ॥३९९

व्यसनाभिप्लुते पुत्रे बाले (लो) वा यत्र दृश्यते ।
द्रव्यहृद्दाप्यते तत्र तस्याभावे पुरन्ध्रिहृत् ॥४००

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वं दद्याद्धनग्राहः पुत्रस्तस्मादनन्तरम् ।
योषिद्ग्राहः सुताभावे पुत्रो वात्यन्तनिर्धनः ॥४०१

अमतेनैव पुत्रस्य प्रधना यान्यमाश्रयेत् ।
पुत्रेणैवापहार्यं तद्धनं दुहितृभिर्विना ॥४०२

ऋणार्थमाहरेत्तन्तु न सुखार्थं कदाचन ।
अयुक्ते कारणे यस्मात् पितरौ तु न दापयेत् ॥४०३

या स्वपुत्रन्तु जह्यात् स्त्री समर्थमपि पुत्रिणी ।
आहृत्य स्त्रीधनं तत्र पित्र्यर्णं शोधयेन्मनुः ॥४०४

बालपुत्राधिकार्था च भर्त्तारं यान्यमाश्रिता ।
आश्रितस्तदृणं दद्याद्बालपुत्राविधिः स्मृतः ॥४०५

दीर्घप्रवासिनिर्बन्धुजडोन्मत्तादिलिङ्गिनाम् ।
जीवतामपि दातव्यं तत्स्त्रीद्रव्यसमाश्रितैः ॥४०६

उद्धारादिकमादाय स्वामिने न ददाति यः ।
स तस्य दासो भृत्यः स्त्री पशुर्वा जायते ऋणी ॥४०७

धार्योऽवरुद्धस्तृणिकः प्रकाशं जनसंसदि ।
यावन्न दद्याद्देयञ्च देशाचारस्थितिर्यथा ॥४०८

पीडनेनोपरोधेन साधयेदृणिकं धनी ।
कर्मणा व्यवहारेण सान्त्वेनादौ विभावितः ॥४०९

आददीतार्थमेवन्तु व्याजेनाचरितेन च ।
राजानं स्वामिनं विप्रं सान्त्वेनैव प्रदापयेत् ॥
ऋक्थिनं सुहृदं वापि छलेनैव प्रसाधयेत् ॥४१०

वणिजः कर्षकांश्चैव शिल्पिनश्चाब्रवीद्भृगुः ।
देशाचारेण दाप्याः स्युर्दुष्टान् सम्पीड्य दापयेत् ॥४११

In Public domain. Digitization Muthulakshmi Research Academy

विण्मूत्रसंज्ञा (शङ्का) यस्य स्याद्धार्यमाणस्य देहिनः ।
पृष्टतो वानुगन्तव्यं निबन्धं वा समुत्सृजेत् ॥४१२

स कृतप्रतिभूश्चैव मोक्तव्यश्च दिने दिने ।
आहारकाले रात्रौ च निबन्धे प्रतिभूः स्थितः ॥४१३

यो दर्शनप्रतिभुवं नाधिगच्छेन्न चाश्रयेत् ।
स चारके निरोद्धव्य स्थाप्यो वावेद्य रक्षिणः ॥४१४

न चारके निरोद्धव्य आर्यः प्रात्ययिकः शुचिः ।
सोऽनिरुद्धः प्रमोक्तव्यो निरुद्धः शपथेन वा ॥४१५

धनदानासहं (बु) बध्वा स्वाधीनं कर्म कारयेत् ।
अशक्तो वन्धनागारे प्रवेश्यो ब्राह्मणादृते ॥
कर्षकान् क्षत्रविट्शूद्रान् समहीनांश्च दापयेत् ॥४१६

यदि ह्यादावनादिष्टमशुभं कर्म कारयेत् ।
प्राप्नुयात् साहसं पूर्वमृणान्मुच्येत चर्णिकः ॥४१७

ग्राह्यं स्याद्विगुणं द्रव्यं प्रयुक्तं धनिना सदा ।
लभेत चेन्न द्विगुणं पुनर्वृद्धिं प्रकल्पयेत् ॥४१८

पीडयेत्तु धनो यत्र ऋणिकं न्यायवादिनम् ।
तस्मादर्थात् स हीयेत तत्समं चाप्नुयाद्दमम् ॥४१९

पितृणां सूनुभिर्जातैर्दानिनैवाधमादृणात् ।
विमोक्षस्तु युतस्तस्मादिच्छन्ति पितरः सुतान् ॥४२०

अप्राप्तव्यवहारश्चेत् स्वतन्त्रोऽपीह नर्णभाक् ।
ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितम् ॥४२१

अथ ऋणसमवाये दुस्साधाधमर्णविधिः।४२२-४२४

नानार्णसमवाये तु यद्यत् पूर्वकृतं भवेत् ।
तत्तदेवाग्रतो देयं राज्ञः स्यात् श्रोत्रियादनु ॥४२२

In Public domain. Digitization Muthulakshmi Research Academy

एकाहे लिखितं यत्र तत्र कुर्यादृणं समम् ।
ग्रहणं लक्षणं लाभमन्यथा तु यथाक्रमम् ।।४२३

यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत् ।
तद्द्रव्यमृणिकेनैव दातव्यं तस्य नान्यथा ।।४२४

अथ पुत्रैरदेयानि। ४२५-४२७

सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतम् ।
प्रातिभाव्यं दण्डशुल्कशेषं पुत्रैर्न दापयेत् ।।४२५

लिखितं मुक्तकं वापि देयं यत्तु प्रतिश्रुतम् ।
परपूर्वस्त्रियै तत्र विद्यात् कामकृतं नृणाम् ।।४२६

यत्र हिंसां समुत्पाद्य क्रोधाद्द्रव्यं विनाश्य च ।
उक्तं तुष्टिकरं यत्तु विद्यात् क्रोधकरं तु तत् ।।४२७

अथ वृद्धिः ४२८-४३१

न स्त्रीभ्यो दासबालेभ्यः प्रयच्छेत् किञ्चिदुद्धृतम् ।
दाता न लभते तत्तु तेभ्यो दत्तन्तु यद्भवेत् ।।४२८

ऋणिकेन तु या वृद्धिरधिका सम्प्रकल्पिता ।
आपत्कालकृता नित्यं दातव्या तु सा कारिता ।
अन्यथाकारिता वृद्धिर्दातव्या न कथञ्चन ।।४२९

आधिभोगस्त्वशेषो यो वृद्धिस्तु परिकल्पिता ।
प्रयोगो यत्र चैवं स्यादाधिभोगः स उच्यते ।।४३०

एकान्तेनैव वृद्धिं तु शोधयेद्यत्र चर्णिकम् ।
प्रतिकालं ददात्येव शिखावृद्धिस्तु सा स्मृता ।।४३१

अथाकृतवृद्धिः। ४३२-४३४

कृत्वोद्धारमदत्त्वा यो याचितश्च दिशं व्रजेत् ।
ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात् ।।४३२

In Public domain. Digitization Muthulakshmi Research Academy

पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् ।
ऋतुत्रयस्योपरिष्टात् तद्धनं वृद्धिमाप्नुयात् ।।४३३

यो याचितकमादाय तमदत्त्वा दिशं व्रजेत् ।
ऊर्ध्वं संवत्सरात् तस्य तद्धनं वृद्धिमाप्नुयात् ।।४३४

परमवृद्धिः। ४३५-४३६

मणिमुक्ताप्रवालानां सुवर्णरजतस्य च ।
तिष्ठति द्विगुणा वृद्धिः फालकैटाविकस्य च ।।४३५

तैलानाम् चैव सर्वेषां मद्यानामथ सर्पिषाम् ।
वृद्धिरष्टगुणा प्रोक्ता गुडस्य लवणस्य च ।।४३६

वृद्धिनिषेधः। ४३७-४४०

स्वदेशेऽपि स्थितो यस्तु न दद्यात् याचितं क्वचित् ।
तत्त्वतोऽकारितां वृद्धिमनिच्छन्तं च दापयेत् ।।४३७

निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च ।
याच्यमानमदत्तं चेद् वर्धते पञ्चकं शतम् ।।४३८

प्रीतिदत्तं न वर्द्धेत यावन्न प्रतियाचितम् ।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ।।४३९

चर्मशस्यासवद्यूतपण्यमूल्येषु सर्वदा ।
स्त्रीशुल्के च न वृद्धिः स्यात् प्रातिभाव्यागतेषु च ।।४४०

अथ आधिः ४४१-४४७

अकाममननुज्ञातमाधिं यः कर्म कारयेत् ।
भोक्ता कर्मफलं दाप्यः वृद्धिं वा लभते न सः ।।४४१

बलादकामं यत्राधिमनिसृष्टं प्रवेशयेत् ।
प्राप्नुयात्साहसं पूर्वमाधाता चाधिमाप्नुयात् ।।४४२

In Public domain. Digitization Muthulakshmi Research Academy

यश्चाधिं कर्म कुर्वाणं वाचा दण्डेन कर्मभिः ।
पीडयेद्भर्त्सयेच्चैव प्राप्नुयात् पूर्वसाहसम् ॥४४३

न च धनिकदोषेण निष्पतेद्वा म्रियेत वा ।
आधिमन्यं स दाप्यः स्यादृणान्मुच्येत नर्णिकः ॥४४४

आधीकृतन्तु यत्किञ्चिद्विनष्टं दैवराजतः ।
तदृणं सोदयं दाप्यो धनिनामधमर्णकः ॥४४५

आधिमेकं द्वयोर्यत्र कुर्यात् का प्रतिपद् भवेत् ।
द्वयोः पूर्वतरं ग्राह्यमाधाता चौरदण्डभाक् ॥४४६

आधिं दुष्टेन लेख्येन भुङ्क्ते यमृणिकाद्धनी ।
नृपो दमं दापयित्वा आधिख्यं विनाशयेत् ॥४४७

अथाधिसिद्धिः। ४४८-४५०

मर्यादाचिह्नितं क्षेत्रं ग्रामं वापि यदा भवेत् ।
ग्रामादयश्च लिख्यन्ते तदा सिद्धिमवाप्नुयात् ॥४४८

आधाता यत्र न स्यात्तु धनी बन्धं निवेदयेत् ।
राज्ञे ततः समाख्यातो विक्रेय इति धारणा ॥४४९

सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेत् ॥४५०

अथ प्रतिभूविधिः। ४५१-४५९

दर्शनप्रतिभू यत्र देशे काले च दर्शयेत् ।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥४५१

दानोपस्थान विश्वास विवाद शपथाय च ।
लग्नकं दापयेद्देयं यथायोगं विपर्यये ॥४५२

नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परम् ।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥४५३

In Public domain. Digitization Muthulakshmi Research Academy

काले प्रतीते प्रतिभूर्यदि तं नैव दर्शयेत् ।
स तमर्थं प्रदाप्यः स्यात् प्रेते चैवं विधिः स्मृतः ।।४५४

यस्यार्थे येन यद्दत्तं विधिनाभ्यर्थितेन तु ।
साक्षिभिर्भावितेनैव प्रतिभूस्तत्समाप्नुयात् ।।४५५

गृहीत्वा बन्धकं यस्तु दर्शनप्रतिभूः स्थितः ।
विभाव्यो वादिना तत्र दाप्यस्स्यात् तत्सुतोऽप्यृणम् ।।४५६

प्रातिभाव्यागतं पौत्रैर्दातव्यं न तु तत् क्वचित् ।
पुत्रेणापि समं देयमृणं सर्वत्र पैतृकम् ।।४५७

प्रातिभाव्यं तु यो दद्यात् पीडितः प्रतिभावितः ।
त्रिपक्षात् परतः सोऽर्थं द्विगुणं लब्धमर्हति ।।४५८

सन्ततिः स्त्री पशुश्चैव धान्यं त्रिगुणमेव च ।
वस्त्रं चतुर्गुणं प्रोक्तं रसस्याष्टगुणं स्मृतः ।।४५९

अथ निक्षेपः। ४६०-४७८

क्रयः प्रोषितनिक्षिप्तो बन्धान्वाहितयाचितम् ।
वैश्यवृत्त्यर्पितश्चैव सोऽर्थस्तूपनिधिः स्मृतः ।।४६०

अनुमार्गेण कार्येषु अन्यस्मिन् वचनान्मम ।
दद्यास्त्वमिति यो दत्तः स इहान्वाधिरुच्यते ।।४६१

निक्षिप्तं यस्य यत्किञ्चित् तत्प्रयत्नेन पालयेत् ।
देवराजकृतादन्यो विनाशस्तस्य कीर्त्यते ।।४६२

अराजदैवकेनापि निक्षिप्तं यत्र नाशितम् ।
ग्रहीतुस्सह भाण्डेन दातुर्नष्टं तदुच्यते ।।४६३

ज्ञात्वा द्रव्यवियोगन्तु दाता यत्र विनिक्षिपेत् ।
सर्वोपायविनाशेऽपि ग्रहीता नैव दाप्यते ।।४६४

In Public domain. Digitization Muthulakshmi Research Academy

ग्राहकस्य हि यद्दोषान्नष्टन्तु ग्राहकस्य तत् ।
तस्मिन्नष्टेहृते वापि ग्रहीता मूल्यमाहरेत् ॥४६५

यस्य दोषेण यत्किञ्चिद्विनश्येत ह्रियेत वा ।
तद्रव्यं सोदयं दाप्यो देवराजहृताद्विना ॥४६६

सर्वेषूपनिधिष्वेते विधयः परिकीर्तिताः । ४६७

यो याचितकमादाय न दद्यात् प्रतियाचितः ।
स निगृह्य बलाद्दाप्यो दण्ड्यश्च न ददाति यः ॥४६८

यदि तत्कार्यमुद्दिश्य कालं परिनियस्य वा ।
याचितोऽर्द्धकृते तस्मिन्नप्राप्ते न तु दाप्यते ॥४६९

याचितानन्तरं नाशे देवराजकृतेऽपि सः ।
तस्मिन्नष्टे ग्रहीता तु प्रतिदाप्यः सदा भवेत् ॥४७०

याच्यमानो न दद्याद्दाप्यस्तत्सोदयं भवेत् ।
प्राप्तकाले कृते कार्ये न दद्याद्याचितोऽपि सन् ॥४७१

अथ कार्यविपत्तिस्तु तस्यैव स्वामिनो भवेत् ।
अप्राप्ते वै स्वकाले तु दाप्यस्त्वर्धकृतेऽपि तत् ॥४७२

ग्राह्यस्तूपनिधिः काले कालहीनन्तु वर्जयेत् ।
कालहीनेऽददद्दण्डं द्विगुणञ्च प्रदाप्यते ॥४७३

यैश्चसंस्क्रियते न्यासो दिवसै परिनिश्चितैः ।
तदूर्ध्वं स्थापयेच्छिल्पी दाप्यो दैवहतेऽपि तम् ॥४७४

स्वल्पेनापि च यत्कर्म्म नष्टञ्चेद्भृतकस्य तत् ।
पर्याप्तं दित्सतस्तस्य विनश्येत्तदगृह्णतः ॥ ४७५

न्यासदोषाद्विनाशः स्याच्छिल्पिनस्तन्न दापयेत् ।
दापयेच्छिल्पिदोषात्तु संस्कारार्थं यदर्पितम् ॥४७६

In Public domain. Digitization Muthulakshmi Research Academy

न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम् ।
अज्ञाननाशितं चैव येन दाप्यः स एव तु ।।४७७

भक्षिते सोदयन्दाप्यः समन्दाप्य उपेक्षिते ।
किञ्चिदूनं प्रदाप्यं स्याद्द्रव्यमज्ञाननाशितम् ।।४७८

अथास्वामिविक्रयः। ४७९-४९१

अस्वामिविक्रयं दानमाधिञ्च विनिवर्त्तयेत्।।४७९(?)

प्रकाशं वा क्रयं कुर्यात् साधुभिर्ज्ञातृभिः सह।
न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुपी।।
अलेख्येऽसाक्षिके दैवीं व्यवहारे विनिर्दिशेत्।।४८०(?)

प्रकाशं वा क्रयं कुर्यान्मूलं वापि समर्पयेत्।
मूलानयनकालस्तु देयो योजनसंख्यया।।४८१

यदा मूलमुपन्यस्य पुनर्वादी क्रयं वदेत्।
आहरेम्मूलमेवासौ न क्रयेण प्रयोजनम्।।४८२

अभियोक्ता धनं कुर्यात् प्रथमं ज्ञातृभिः स्वकम्।
पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबन्धुभिः।।४८३

असमाहार्यमूलस्तु क्रयमेव विशोधयेत्।
विशोधिते क्रये राज्ञे वक्तव्यः स न किञ्चन।।४८४

अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन्।
यथाभियोगं धनिने धनं दाप्यो दमश्च सः।।४८५

नाष्टिकस्तु प्रकुर्वीत तद्धनं ज्ञातृभिः स्वकम्।
अदत्तव्यक्तविक्रीतं कृत्वा स्वं लभते धनम्।।४८६

यदि स्वं नैव कुरुते ज्ञातृभिर्नाष्टिको धनम्।
प्रसङ्गविनिवृत्यर्थं चौरवद्दण्डमर्हति।।४८७

In Public domain. Digitization: Muthulakshmi Research Academy

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
अविज्ञाताश्रयात्क्रेता विक्रेता यत्र वा मृतः ॥४८८

स्वामी दत्त्वाऽर्धमूल्यं तु प्रगृह्णीत स्वकं धनम् ।
अर्धं द्वयोरपि हृतं तत्र स्याद्व्यवहारतः ॥४८९

अविज्ञातक्रयो दोषस्तथा चापरिपालनम् ।
एतद्वयं समाख्यातं द्रव्यहानिकरं बुधैः ॥४९०

चौरतः सलिलादग्नेर्द्रव्यं यस्तु समाहरेत् ।
तस्यांशो दशमोदयः सर्वद्रव्येष्वयं विधिः ॥४९१

अथ सम्भूयसमुत्थानम्। ४९२-४९६

शिक्षकाभिज्ञकुशला आचार्याश्चेति शिल्पिनः ।
एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम् ॥४९२

परराष्ट्राद्धनं यत्स्याच्चौरैः स्वाम्याज्ञया हृतम् ।
राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि ॥४९३

चौराणां मुख्यभूतस्तु चतुरोऽशांस्ततो हरेत् ।
शूरोंऽशांस्त्रीन् समर्थो द्वौ शिष्टास्त्वेकैकमेव च ॥४९४

तेषां चेत् प्रसृतानां यो ग्रहणं समवाप्नुयात् ।
तन्मोक्षणार्थं यद्दत्तं तस्य कार्या समा क्रिया ॥४९५

वणिजां कर्षकाणाञ्च चौराणां शिल्पिनां तथा ।
अनियम्यांशकतृणां सर्वेषामेष निर्णयः ॥४९६

अथ दत्ताप्रदानिकम्। ४९८-५११

विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः ।
दाराः पुत्राय सर्वस्वमात्मन्येव तु योजयेत् ॥४९७

विभक्ता अविभक्ता वा दायादाः स्थावरे समाः ।
एकोऽप्यनीशः सर्वत्र दानाधमनविक्रये ॥४९८

In Public domain. Digitization Muthulakshmi Research Academy

आपत्काले प्रकर्त्तव्यं दानं विक्रय एव वा ।
अन्यथा न प्रवर्तेत इति शास्त्रविनिर्णयः ॥४९९

सर्वस्वं गृहवर्जन्तु कुटुम्बभरणाधिकम् ।
यद्द्रव्यं तत्स्वकं देयमदेयं स्यात्ततोऽन्यथा ॥५००

स्वेच्छया तु प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम् ।
न दद्यादृणवद्दाप्यः प्राप्नुयात्पूर्वसाहसम् ॥५०१

स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात् ।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र मंशयः ॥५०२

अविज्ञातोपलब्ध्यर्थं दानं यत्र निरूपितम् ।
उपलब्धिक्रियालब्धं सा भृतिः परिकीर्त्तिता ॥५०३

भयत्राणाय रक्षार्थं तथा कार्यप्रसाधनम् ।
अनेन विधिना लब्धं विद्यात्प्रत्युपकारतः ॥५०४

प्राणसंशयमापन्नं यो मामुत्तारयेदितः ।
सर्वस्वं तस्य दास्यामीत्युक्तेऽपि न तथा भवेत् ॥५०५

कामक्रोधास्वतन्त्रार्त्तक्लीबोन्मत्तप्रमोहितैः ।
व्यत्यासाच्च परीहासाद्यद्दत्तं तत्पुनर्हरेत् ॥५०६

या तु कार्यस्य सिद्ध्यर्थमुत्कोचा स्यात् प्रतिश्रुता ।
तस्मिन्नपि प्रसिद्धेऽर्थे न देया सा कथञ्चन ॥५०७

तथा प्रागेव दत्ता स्यात्प्रतिदाप्यः स तां बलात् ।
दण्डश्चैकादशगुणमाहुर्गार्गीयमानवाः ॥५०८

स्तेनसाहसिकोद्वृत्तपारजायिकशंसनात् ।
दर्शनाद्वृत्तनष्टस्य तथासत्यप्रवर्त्तनात् ॥५०९

प्राप्तमेतैस्तु यत्किञ्चित्तदुत्कोचाख्यमुच्यते ।
न दाता तत्र दण्ड्यः स्यात् मध्यस्थश्चैव दण्डभाक् ॥५१०

In Public domain. Digitization Muthulakshmi Research Academy

अथ दासकर्मकरादयः। ५११-५२७

विण्मूत्रोन्मार्जनञ्चैव नग्नत्वपरिमर्द्दनम् ।
प्रायो दासीसुताः कुर्युर्गवादिग्रहणञ्च यत् ॥५११

दासस्य तु धनं यत्स्यात् स्वामी तत्र प्रभुः स्मृतः ।
प्रकाशं विक्रयाद्यत्तु न स्वामी धनमर्हति ॥५१२

स्वतन्त्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः ।
त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रे न विद्यते ॥५१३

दासेनोढ़ा त्वदासी या साऽपि दासीत्वमाप्नुयात् ।
यस्माद्भर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यथा ॥५१४

वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ।
राजन्यवैश्यशूद्राणां त्यजतां हि स्वतन्त्रताम् ॥५१५

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते ।
स्वधर्मत्यागिनोऽन्यत्र दारवद् दासता स्मृता ॥५१६

समवर्णेऽपि विप्रन्तु दासत्वं नैव कारयेत् ।
शीलाध्ययनसम्पन्नं तदूनं कर्मकामतः ॥५१७

तत्रापि नाशुभं किञ्चित् प्रकुर्वीत द्विजोत्तमः ।
ब्राह्मणस्य हि दासत्वान्नृपतेजो विहन्यते ॥५१८

क्षत्रविट्शूद्रधर्मस्तु समवर्णे कदाचन ।
कारयेद्दासकर्माणि ब्राह्मणं न बृहस्पतिः ॥५१९

प्रवज्यावसिता यत्रं त्रयो वर्णा द्विजातयः ।
निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविड्भृगुः ॥५२०

आदद्याद्ब्राह्मणीं यस्तु विक्रीणीयात्तथैव च ।
राज्ञा तदकृतं कार्यं दण्डपाः स्युः सर्व एव ते ॥५२१

In Public domain. Digitization Muthulakshmi Research Academy

कामात्तु संश्रितां यश्च दासीं कुर्यात्कुलस्त्रियम् ।
संक्रामयेत्तथान्यत्र दण्ड्यस्तच्चाकृतं भवेत् ॥५२२

स्वदासीं यस्तु सङ्गच्छेत्प्रसूता च भवेत्ततः ।
अवेक्ष्य बीजं कार्या स्याददासी सान्वया तु सा ॥५२३

बालधात्रीमदासीञ्च दासीमिव भुनक्ति यः ।
परिचारकपत्नीं वा प्राप्नुयात्पूर्वसाहसम् ॥५२४

विक्रोशमानां यो भुक्तां दासीं विक्रेतुमिच्छति ।
अनापदिस्थः शक्तः सम्प्राप्नुयाद्विशतं दमम् ॥५२५

शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् ।
एते कर्मकरा ज्ञेया दासास्तु गृहजातयः ॥
आ विद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम् ॥ ५२६
यस्तु न ग्राहयेत् शिल्पं कर्माण्यन्यानि कारयेत् ।
प्राप्नुयात्साहसं पूर्वं तस्माच्छिष्यो निवर्त्तते + ॥५२७

अथ वेतनस्यानपाक्रिया। ५२८-५३३

कर्मारम्भन्तु यः कृत्वा सर्वं नैव तु कारयेत् ।
बलात्कारयितव्योऽसावकुर्वन्दण्डमर्हति ॥५२८

यथा च पथि तद्भाण्डमासिध्येत ह्रियेत वा ।
यावानध्वा गतस्तेन तावतो लभते भृतिम् ॥ ५२९

त्यजेत्पथिसहायं यः श्रान्तं रोगार्त्तमेव वा ।
प्राप्नुयात्साहसं पूर्वं ग्रामे त्र्यहमपालयन् ॥ ५३०
विघ्नयन्वाहको दाप्यः प्रस्थाने द्विगुणं स्मृतम् ॥५३१

गृहवार्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिने नार्पयेद्यावत्तावद्दाप्यस्तु भाटकम् ++॥५३२

+ Vir.M.p.154-55, Sm.Ch.p.457. ++ Vir.M.p.150-68, V.M.P.419-21, Sm.Ch.p.473-8.

In Public domain. Digitization Mumukshu Research Academy

हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ।
नार्पयेत्कृतकृत्यः संस्तावद्दाप्यः स भाटकम् ।।५३३

अथ संविद्व्यतिक्रमः। ५३४-५४२

समूहा (हि) नान्तु यो धर्मस्तेन धर्मेन ते सदा ।
प्रकुर्युः सर्वकार्याणि स्वधर्मेषु व्यवस्थिताः ।।५३४*

अविरोधेन धर्मस्य निर्गतं राजशासनम् ।
तस्यैवाचरणं पूर्वं कर्त्तव्यं तु नृपाज्ञया ।।५३५

युक्तियुक्तञ्च यो हन्याद् वक्तुर्योऽनवकाशदः।
अयुक्तञ्चैव यो ब्रूयात्प्राप्नुयात्पूर्वसाहसम् ।।५३६

राज्ञा पवर्तितान्धर्मान् यो नरो नानुपालयेत् ।
ग्राह्यः स पापो दण्ड्यश्च कोपयन् राजशासनम् ।।५३७

साहसी भेदकारी च गणद्रव्यविनाशकः ।
उच्छेद्याः सर्व एवैते विख्याप्यैवं नृपैर्भृगुः ।।५३८

एकपात्रेऽथ पङ्क्त्या वा सम्भोक्ता येन यो भवेत् ।
अकुर्वंस्तत्तथा दण्ड्यस्तस्य दोषमदर्शयन् ।।५३९

गणमुद्दिश्य यत्किञ्चित्कृत्वर्णं भक्षितं भवेत् ।
आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत् ।।५४०

+गणानां श्रेणिवर्गाणां गताः स्युर्ये तु मध्यताम् ।
प्राक्तनस्य धनर्णस्य समांशाः सर्व एव ते ।।५४१

तथैव भोज्यवैभाव्ययानधर्मक्रियासु च ।
समूहस्थोऽंशभागी स्यात्प्रगतस्त्वंशभाङ् न तु ।।५४२++

---

* Sm.Ch.p.479, V.M.p.420, V.R.p.168-9. + गणिनां शिल्पिवर्गाणामिति स्मृतिचन्द्रिकाधृतपाठः। ++ V.R.p.179-188, Sm.Ch.p.525-533.

In Public domain. Digitization Muthulakshmi Research Academy

अथ संविद्व्यतिक्रमे नैगमादिसंज्ञा । ५४३-५४८

नानापौरसमूहस्तु नैगमस्तु प्रकीर्तितः ।
नानायुधधरव्राताः समवेताः प्रकीर्तिताः ॥५४३

समूहो वणिजादीनां पूगः सम्परिकीर्तितः ।
प्रव्रज्यावसिता ये तु पाषण्डाः परिकीर्तिताः ॥५४४

ब्राह्मणानां * समूहस्तु गणः सम्परिकीर्तितः ।
शिल्पोपजीविनो ये तु शिल्पिनः परिकीर्तिताः ॥५४५

आर्हतसौगतानान्तु समूहः सङ्घ उच्यते ।
चाण्डालश्वपचादीनां समूहो गुल्म उच्यते ॥५४६

गणपाषण्डपूगाश्च व्राताश्च श्रेणयस्तथा ।
समूहस्थाश्च ये चान्ये वर्गाख्यास्ते वृहस्पतिः ॥५४७

चातुर्वर्ण्यस्य या सूतिरसजात्यादिसम्भवा ।
तस्या धर्माः समुद्दिष्टाः जातिः सा परिकीर्तिताः ॥५४८+

अथ विक्रीयासम्प्रदानं क्रीत्वानुशयश्च। ५४९-५५४

क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम् ।
स मूल्याद्दशभागन्तु दत्वा स्वं द्रव्यमाप्नुयात् ॥५४९

अप्राप्तेऽर्थेक्रियाकारे (ले) कृते नैव प्रदापयेत् ।
एवं धर्मो दशाहात्तु परतोऽनुशयो न तु ॥५५०

क्रीत्वा वानुशयात्पण्यं त्यजेद्दोह्यादि यो नरः।
अदुष्टमेव काले तु स मूल्याद्दशमं वहेत् ॥५५१++

क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते ।
षड्भागं तत्र मूल्यस्य दत्त्वा क्रीतं त्यजेद्भृगुः(बुधः) ॥५५२

---

* कुलानां समुहस्तु इति स्मृतिचन्द्रिकाधृतपाठः। + V.R.p.668; Sm.Ch.p.40,524
++ V.R.p.191-192. Sm.Ch.511.

In Public domain. Digitization Muthulakshmi Research Academy

भूमेर्दशाहोऽनुशयः क्रेतुर्विक्रेतुरेव च ।
* * * * * ॥५५३

अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितम् ।
क्रीतं तत्स्वामिने देयं पण्यं कालेऽन्यथा न तु ॥५५४*

अथ सीमाविवादः। ५५५-५७३

आधिक्यं न्यूनता चास्ते अस्ति नास्तित्वमेव च ।
अभोगे (आभोग) भुक्तिः सीमा च षड् भूवादस्य हेतवः ॥५५५

तस्मिन् भोगः प्रयोक्तव्यः स च साक्षिषु तिष्ठति ।
लेख्यारूढश्चेतरश्च साक्षी मार्गद्वयान्वितः ॥५५६

तेषामभावे सामन्ता मौलवृद्धोद्धृतादयः ।
स्थावरे षट्प्रकारेऽपि नात्र कार्या विचारणा ॥५५७

क्षेत्रवास्तुतडागेषु कूपोपवनसेतुषु ।
द्वयोर्विवादे सामन्तः प्रत्ययः सर्ववस्तुषु ॥५५८

सीमान्तभावात्+ सामन्तैः कुर्यात्क्षेत्रादिनिर्णयम् ।
ग्रामसीमासु च तथा तत्त्वं नगरदेशयोः ॥५५९

स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
तत्संसक्तेषु कर्तव्य उद्धारो नात्र संशयः ॥५६०

संसक्तसक्तदुष्टेषु सत्संसक्ताः प्रकीर्तिता ।
कर्तव्या न प्रदुष्टास्तु राज्ञा धर्मं विजानता ॥५६१

त्यक्त्वा दुष्टांस्तु सामन्तानन्यान्मौलादिभिः सह ।
समीक्ष्य कारयेत्सीमामेवं धर्मविदो विदुः ॥५६२++

सामन्ताः साधनं पूर्वमनिष्टोक्तौ गुणान्विताः ।
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः ॥५६३

---

* V.R.p.197-9, Sm.Ch.p.512-13 + सामन्तभावे इति पाठान्तरम् । ++ V.R.p.201-203, Sm.Ch.p.540-45.

In Public domain. Digitization Muthulakshmi Research Academy

बहूनान्तु गृहीतानां न सर्वे निर्णयं यदि ।
कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम् ।।५६४

अज्ञानेन हि * मुच्यन्ते सामन्ता निर्णयं यदि ।
अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेत् ।।
कीर्तिते यदि भेदः स्यात् दण्ड्यास्तूत्तमसाहसम् ।।५६५

संसक्तास्त्वथ सामन्तास्तत्संसक्तास्तथोत्तराः।
संसक्तसक्तसक्तान्ताः पद्माकाराः प्रकीर्तिताः।।५६६

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्।
गृहं गृहस्य निर्दिष्टं समन्तात् परिरभ्य च।।५६७

ये तत्र सर्वसामन्ताः + पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः सम्प्रकीर्तिताः।।५६८

निष्पाद्यमानं यैर्दृष्टं तत्कार्यं त्रिगुणान्वितैः।
वृद्धा वा यदि वा वृद्धास्ते वृद्धाः परिकीर्तिताः।।५६९

उपश्रवणसम्भोगकार्याख्यानोपचिह्निताः।
उद्धरन्ति ततो यस्मादुद्धृतास्ते प्रकीर्तिताः।।५७०

सामन्तानुमता सीमा सा ज्ञेया राजकारिता।
भयवर्जितभूपेन सर्वाभावे स्वयंकृता।।५७१

सीमाचङ्क्रमणे क्रोशे पादस्पर्शे तथैव तु।
त्रिपक्षपक्षसप्ताहं दैवराजकमिष्यते।।
वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत्।।५७२

क्षेत्रकूपतडागानां केदारारामयोरपि।
गृहप्रासादावसथक्षेत्रदेवगृहेषु च।
सामन्तप्रत्ययो ज्ञेयः सीमासन्धिविनिर्णयः।।५७३

---

* नाज्ञानेन हीति पाठान्तरं । +पूर्वसामन्ताः

In Public domain. Digitization Muthulakshmi Research Academy

अथ गृहादिविवादः। ५७४-५७७

मेखलाभ्रमनिष्काशगवाक्षान्नोपधारयेत् ।
प्रणालीं गृहवास्तुञ्च पीडयन्दण्डभाग्भवेत् ।।५७४

विण्मूत्रोदकचक्रञ्च (वप्रं) वह्निश्वभ्रनिवेशनम् ।
रत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् ।।५७५

निवेशसमयादूर्ध्वं नैते योज्याः कदाचन ।
दृष्टिप्रासं प्रणालीञ्च न कुर्यात् परवेश्मसु ।।५७६

वर्चः स्थानं वह्निचयं गर्त्तोच्छिष्टाम्बसेचनम् ।
अत्यारात्परकुड्यस्य न कर्तव्यं कदाचन ।।५७७*

अथ राजमार्गादयः । ५७८-५८६

सर्वजनपदा + येन प्रयान्ति सचतुष्पदाः ।
अनिरुद्धा यथाकामं राजमार्गः स उच्यते ।।५७८

न तत्र रोपयेत्किञ्चिन्नोपहन्यात्तु केनचित् ।
गुर्वाचार्यनृपादीनां मार्गादानात्तु दण्डभाक् ।।५७९

यस्तत्र सङ्करश्वभ्रान्वृक्षारीपणमेव च ।
कामात्पुरीषं कुर्याच्च तस्य दण्डस्तु माषकः ।।५८०

तडागोद्यानतीर्थानि योऽमेध्येन विनाशयेत् ।
अमेध्यं शोधयित्वा तु दण्डयेत्पूर्वसाहसम् ।।५८१

दूषयन् सिद्धतीर्थानि स्थापितानि महात्मभिः।
धान्यानि वापनीयानि प्राप्नुयात्पूर्वसाहसम्।।५८२

सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः।
फलं पुष्पञ्च सञ्जातं क्षेत्रस्वामिषु निर्दिशेत्।।५८३

---

* Sm.Ch.p.551-2,V.M.p.463-4, V.R.p.217-220. + सर्वजनाः सदा इति पाठान्तरं

In Public domain. Digitization Muthulakshmi Research Academy

अन्यक्षेत्रे तु जातानां शाखा यत्रान्यसंस्थिता।
स्वामिनं तु विजानीयाद्यस्य क्षेत्रेषु संस्थिता।।५८४

अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः।
गृहोद्यानतडागानां संस्कर्ता लभते न तु।।५८५

व्ययं * स्वामिनि चायाते न निवेद्य नृपे यदि।
अथावेद्य प्रयुक्तस्तु तत्कृतं लभते व्ययम् +।।५८६

अथ कृष्टाकृष्टे विशेषविधिः। ५८७

अशक्तितो न दद्याच्चेत्खिलार्थे यत्कृतो व्ययः।
तदष्टभागहीनन्तु कर्षकः (फल) कर्षमाप्नुयात्।।
वर्षाण्यष्टौ स भोक्ता स्यात्परतः स्वामिने तु तत् ++।।५८७

अथ शस्यरक्षा घातश्च । ५८८-५९१

अजातेष्वेव शस्येषु कुर्यादावरणं महत् ।
दुःखेन हि निवार्यं ते लब्धास्वादरसा मृगाः ।।५८८

दापयेत्पणपादं गां द्वौ पादौ महिषीं तथा ।
तथाजाविकवत्सानां पादो दण्डः प्रकीर्त्तितः ।।५८९

अधमोत्तममध्यानां पशूनाञ्चैव ताडने ।
स्वामी तु विवदेद्यत्र तत्र दण्डं प्रकल्पयेत् ।।५९०

क्षेत्रारामविवीतेषु गृहेषु पशुवाढिषु ।
ग्रहणं तत्प्रविष्टानां ताडनञ्च बृहस्पतिः* ।।५९१

अथ वाक्पारुष्यम् ।५९२-६०१

यस्त्वसत्संज्ञितैरङ्गैः (ङ्कैः) परमाक्षिपति क्वचित् ।
अभूतैरथ भूतैर्वा निष्ठुरा वाक् स्मृता तु सा (बुधैः) ।।५९२

---

*देयमिति पाठान्तरम्। + Sm.Ch.p.551-60,V.M.p.468-70, V.R.p.220-25.
++ Sm.Ch.p.560,V.M.p.470, V.R.p.227. * Sm.Ch.p.487-94.

In Public domain. Digitization Muthulakshmi Research Academy

न्यङ्गावगूरणं + वाचा क्रोधात्तु कुरुते यदा ।
वृत्तदेशकुलानाञ्च अश्लीला सा बुधैः स्मृता ।।५९३

महापातकयोक्ती च रागद्वेषकरी च या ।
जातिभ्रंशकरी या च तीव्रा सा प्रथिता तु वाक् ।।५९४

हुङ्कारः कासनं चैव लोके यच्च विगर्हितम् ।
अनुकुर्यादनुब्रूयाद्वाक्पारुष्यं तथोच्यते ।।५९५

योऽगुणान् कीर्त्तयेद्द्वेषान्निर्गुणे वा गुणज्ञताम् ।
अन्यसंज्ञानियोजी च वाग्दुष्टं तं नरं विदुः ।।५९६

अदुष्टस्यैव यो दोषान् कीर्त्तयेद्दोषकारणात्।
अन्यापदेशवादी च वाग्दुष्टं तं नरं विदुः।।५९७

मोहात्प्रमादात्संहर्षात् प्रीत्या वोक्तं मयेति यः ।
नाहमेवं पुनर्वक्ष्ये दण्डार्द्धं तस्य कल्पयेत् ।।५९८

यत्र स्यात्परिहारा (सा?)र्थं पतितस्तेनकीर्त्तनम् ।
वचनात्तत्र न स्यात्तु दोषो यत्र विभावयेत् ।।५९९

अन्यथा तुल्यदोषः स्यान्मिथ्योक्तौ तूत्तमः स्मृतः ।
महता प्रणिधानेन वाग्दुष्टं माधयेन्नरम् ।।६००

अतथ्यं श्रावितं राजा प्रयत्नेन विचारयेत् ।
अनृताख्यानशीलानां जिह्वाच्छेदो विशोधनम् ++ ।।६०१

अथ दण्डपारुष्यम् ।६०२-६१७

उद्गूरणे तु हस्तस्य कार्यो द्वादशको दमः ।
स एव द्विगुणः प्रोक्तः पातनेषु सजातिषु ।।६०२

+न्यग्भावकरणमिति - स्मृतिचन्द्रिकावीरमित्रोदयधृतः पाठः। ++Sm.Ch.p.12-13, V.R.p.243-58, V.M.p.482-84.

In Public domain. Digitization Muthulakshmi Research Academy

छर्द्दिमूत्रपुरीषाद्यैः स्पर्शने स चतुर्गुणः ।
षड्गुणः कायमध्ये स्यात् मूर्ध्नित्वष्टगुणः स्मृतः ॥६०३

कर्णौष्ठघ्राणनासाक्षिजिह्वाशिश्नकरस्य तु ।
छेदने चोत्तमो दण्डो भेदने मध्यमो भृगुः ॥६०४

वाक्पारुष्ये यथैवोक्तः प्रतिलोमानुलोमतः ।
तथैव दण्डपारुष्ये पात्यो दण्डो यथाक्रमम् ॥६०५

वाग्दण्डस्ताडनञ्चैव येषूक्तमपकारिषु ।
हृतं भग्नन्तु दाप्यास्ते शोध्यं निःस्वैस्तु कर्मणा ॥६०६

देहेन्द्रियविनाशे तु यथादण्डं प्रकल्पयेत् ।
तथा तुष्टिकरं देयं समुत्थानञ्च पीडकैः ॥
समुत्थानव्ययञ्चासौ दद्यादाव्रणरोपणम् ॥६०७

हेत्वादिभिर्न पश्येच्चेद्दण्डपारुष्यकारणम् ।
तदा साक्षिकृतं तत्र दिव्यञ्चापि नियोजयेत् ॥६०८

आभीषणेन दण्डेन प्रहरेद्यस्तु मानवः ।
पूर्वं वा पीडितो वाथ स दण्ड्यः परिकीर्त्तितः ॥६०९

अस्पृश्यधूर्तदासानां म्लेच्छानां पापकारिणाम् ।
प्रातिलोम्यप्रसूतानां ताडनं नार्थतो दमः ॥६१०

मनुष्याणां पशूनाञ्च दुःखाय प्रहते सति ।
यथा महत्तरं दुःखं दण्डं कुर्याद्यथा तथा ॥६११

त्रिपणोद्वादशपणो घाते तु पशुपक्षिणाम् ।
सर्पमार्जारनकुलश्वशूकरवधे नृणाम् ॥६१२

गोकुमारीं देवपशुमृक्षाणं वृषभं तथा ।
वाहयन् साहसं पूर्वं प्राप्नुयादुत्तमं दमम् ॥६१३

In Public domain. Digitization Muthulakshmi Research Academy

श्रान्तान्क्षुधार्तांस्तृषितानकाले वाहयेत्तु यः ।
खरगोमहिषोष्ट्रादीन्प्राप्नुयात्पूर्वसाहसम् ॥६१४

प्रमापणे प्राणभृतां प्रतिरूपन्तु दापयेत् ।
तस्यानुरूपं मूल्यं वा दाप्य इत्यब्रवीन्मनुः ॥६१५

वनस्पतीनां सर्वेषामुपरोधो यथा यथा ।
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥६१६

हेत्वादिभिर्नपश्येच्चेत् दण्डपारुष्यकारणम्।
तदा साक्षिकृतन्तत्र दिव्यं चापि नियोजयेत् *॥६१७

अथ स्तेनसाहसिकादीनां दण्डः । ६१८-६४२

सान्वयस्तु प्रहारो यः प्रसह्य हरणञ्च यत् ।
साहसन्तु भवेदेवं स्तेयमुक्तं विनिह्नवः ॥६१८

तुलामानप्रतिमानप्रतिरूपकलक्षितैः ।
चरन्नलक्षितैर्वापि प्राप्नुयात्पूर्वसाहसम् ॥६१९

कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी ।
त्र्यङ्गहीनाश्च कर्तव्या दाप्यास्तूत्तमसाहसम् ॥६२०

मृच्चर्ममणिसूत्रायः काष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विज्ञेयोऽष्टगुणो दमः ॥ ६२१

समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥६२२

भिन्ने पणे तु पञ्चाशत्पणे तु शतमुच्यते ।
द्विगुणे द्विशतो दण्डो मूल्यवृद्धौ च बुद्धिमान् ॥६२३

येन येन परद्रोहं करोत्यङ्गेन तस्करः ।
छिन्द्यात्तत्तु नृपस्तस्य न करोति यथा पुनः ॥६२४

* V.R.p.270-285, V.M.p.475-482.

In Public domain. Digitization Muthulakshmi Research Academy

मानवाः सद्य एवाहुः सहोढानां प्रवासनम् ।
गौतमानामनिष्टं यत्प्राणयुच्छेदाद्धिगर्हितम् ।। ६२५

सहोढमसहोढ वा तत्त्वगमितसाहसम् ।
संगृह्य चिङ्कमावेद्य सर्वस्वैर्विनियोजयेत् ।।६२६

अयः सन्दानगुप्ताश्च मन्दभक्ता बलान्विताः ।
कुर्युः कर्माणि नृपतेरामृत्योरिति कौशिकः ।।६२७

परदेशोद्धृतं धनं स्वदेशे यः समाहरेत् ।
गृहीत्वा तस्य तद्द्रव्यं अदण्डं तं विसर्जयेत् ।।६२८

अन्यहस्तात्परिभ्रष्टमकामादुद्धृतं भुवि ।
चौरेण वा परिक्षिप्तं लोप्त्रं यत्नात् परीक्षयेत् ।।६२९

अचौराद्दापितं द्रव्यं चौरान्वेषणतत्परैः ।
उपलब्धे लभेरंस्ते द्विगुणं तत्र दापयेत् ।।६३०

क्रेतारश्चैव भाण्डानां प्रतिग्राहिण एव च ।
समदण्डाः स्मृताः सर्वे ये च प्रच्छादयन्ति तान् ।।६३१

क्षतं भङ्गोपमर्द्दौ वा कुर्याद्द्रव्येषु यो नरः ।
प्राप्नुयात्साहसं पूर्वं द्रव्यभाक् स्वाम्युदाहृतः ।।६३२

हरेद्भिन्द्याद्दहेच्चापि देवानां प्रतिमां यदि ।
तद्गृहञ्चैव यो भिन्द्यात्प्राप्नुयात्पूर्वसाहसम् ।।६३३

प्राकारं भेदयेद्यस्तु पातयेच्छातयेत्तथा ।
बध्नीयादम्भसो मार्गं प्राप्नुयात्पूर्वसाहसम् ।।६३४

राजक्रीडासु ये सक्ता राजवृत्त्युपजीविनः ।
अप्रियस्य तु वक्तारो वधं तेषां प्रकल्पयेत् ।।६३५

प्रतिरूपस्य कर्त्तारः प्रेक्षणाः प्रकराश्च ये ।
राजार्थमोषकाश्चैव प्राप्नुयुर्विविधं वधम् ।।६३६

In Public domain. Digitization Muthulakshmi Research Academy

प्रमाणेन तु कूटेन मुद्रया वापि कूटया ।
कार्यन्तु साधयेद्यो वै स दाप्यो दण्डमुत्तमम् ।।६३७

एकश्चेद्बहवो हन्युः संरुद्धापुरुषं नराः ।
मर्मघाती तु यस्तेषां स घातक इति स्मृतः ।।
व्यापादनेन तत्कारो वधं चित्रमवाप्नुयात् ।।६३८

आरम्भकृत्सहायश्च तथा मार्गानुदेशकः ।
आश्रयः शस्त्रदाता च भक्तदाता विकर्म्मणाम् ।।६३९

युद्धोपदेशकश्चैव तद्विनाशप्रवर्त्तकः ।
उपेक्षाकार्ययुक्तश्च दोषवक्तानुमोदकः ।।६४०

अनिषेद्धाक्षमो यः स्यात्सर्वे ते कार्यकारिणः ।
यथाशक्त्यनुरूपश्च दण्डमेषां प्रकल्पयेत् ।।६४१

स्वदेशघातिनो ये स्युस्तथा मार्गनिरोधकाः ।
तेषां सर्वस्वमादाय राजा शूले निवेशयेत् * ।।६४२

अथ स्तेनालाभे हृतदानम् । ६४३-६४७

गृहेषु मुषितं राजा चौरग्राहास्तु दापयेत् ।
आरक्षकांस्तु दिक्पालन्यदि चौरो न लभ्यते ।।६४३

ग्रामान्तरेषु हृतं द्रव्यं ग्रामाध्यक्षं प्रदापयेत् ।
विवीते स्वामिना देयं चौरोद्धर्त्रा त्ववीतके ।।६४४

स्वदेशे यस्य वा किञ्चित् हृतं देयं नृपेन तत् ।
गृह्णीयात्तत्स्वयं नष्टं प्राप्तमन्विष्य पार्थिवः ।।६४५

चौरैर्हृतं प्रयत्नेन स्वरूपं प्रतिपादयेत्।
तदभावेऽपि मूल्यं स्यादन्यथा किल्विषी नरः।।६४६

---

* V.R.p.295-340, 368-75, V.M.p.501-504, also p.712, Sm.Ch.p.722 to 735

In Public domain. Digitization Muthulakshmi Research Academy

लब्धे च चौरे यदि च मोषस्तस्मान्न लभ्यते।
दद्यात्तमथवा चौरं दापयेद्वा यथेच्छतः।।६४७*

अथ संग्रहणम् । ६४८-६५७

+भूतोपचारयुक्तश्चेदवेलास्थानसङ्गतः ।
कण्ठकेशाम्बरग्राही कर्णनासाकरादिषु ।।६४८

एकस्थानासनाहारः संग्रहो मुनिभिः स्मृतः ।
न ग्राह्योऽन्यथाकारी ग्राहको दण्डमर्हति ।।६४९

गर्भपातो नखानाञ्च च दर्शनं गर्भधारणम् ।
धारणं परवस्त्राणामलङ्कारायुधस्य च ।।६५०

गन्धमाल्याम्बरैश्चैव लेख्यसंप्रेषणैरपि।
एभिश्चिह्नै सदा ज्ञेया व्यभिचाररतास्त्रियः।।६५१

ग्राहक्रं सर्वमेव स्यादारम्भकरणं हि तत् ।
अस्मत्कुकार्यसंसर्गाद्ग्रहं संग्रहणं विदुः ।।६५२

यानि कर्माण्यभिलषन् पुमान्वै कुरुते क्वचित् ।
आरम्भास्ते तु निर्दिष्टा गर्हिताः कामसाधकाः ।।६५३

कामी तु संस्थितो यत्र आरम्भकामसाधके ।
तत्तत्स्माद्ग्रहणं तस्य प्रासङ्ग्रहणं ह्यतः ।।६५४

परस्त्रियाऽभिभाषेत तीर्थेऽरण्ये गृहेऽपि वा ।
नदीनां चैव सम्भेदे स संग्रहणमाप्नुयात् ।।६५५

उपकारक्रियाकेलिः स्पर्शो भूषणवाससाम् ।
सहखट्वासनं चैव सर्वं संग्रहणं स्मृतम् ।।६५६

स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ।।६५७*

---

* दूतोपक्षार इति पाठान्तरं । + V.R.p.343-45. * Sm.Ch.p.18 V.R.p.382-83.

In Public domain. Digitization Muthulakshmi Research Academy

अथाभिगमदण्डः ६५८-६६२

स्त्रीषु वृत्तोपयोगः (कृतोपभोगः) स्यात्प्रसह्य पुरुषो यदा ।
वधस्तत्र प्रवर्त्तेत कार्यातिक्रमणं हि तत् ॥६५८

सर्वेषु चापराधेषु पुंसोह्यर्थदमस्तथा ।
तदध योषितो दद्युर्वधे पुंसोऽङ्गकर्त्तनम् ॥६५९

नास्वतन्त्राः (न स्वतन्त्राः) स्त्रियो ग्राह्याः पुमांस्तत्रापराध्यते ।
प्रभुणा शासनीयास्ताः राजा तु पुरुषं नयेत् ॥६६०

प्रोषितस्वामिका नारी प्रापिता यद्यभिग्रहे ।
तावत्सा बन्धने स्थाप्या यावत्स्यादागतः प्रभुः ॥६६१

कामार्त्ता स्वैरिणी या तु स्वयमेव प्रकाशयेत् ।
राजादेशेन भोक्तव्या विख्याप्य जनसन्निधौ ॥६६२+

अथ स्त्रीधर्मतरङ्गे स्त्रीरक्षा ६६३-६७१

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ।
कारयेत्तद्बहुत्वञ्चेज्ज्येष्ठ्या गर्हिता न चेत् ॥६६३

या वा स्याद्वीरप्रसूरेषामाज्ञासम्पादिनो प्रिया ।
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ॥६६४

दिनक्रमेण वा कर्म यथाज्यैष्ठं स्वशक्तितः ।
विभज्य सह वा कुर्युर्यथाज्ञानमशाठ्यवत् ॥६६५
स्त्रीणां सौभाग्यतो ज्यैष्ठ्यं विद्ययैव द्विजन्मनाम् ।
नहि स्वल्पेन तपसा भर्त्ता तुष्यति योषिताम् ॥६६६
पत्या चाप्यवियोगिन्या शुश्रूष्योऽग्निविनीतया ।
सौभाग्यवदवैधव्यकाम्यया भर्तृभक्तया ॥६६७
भर्तुरादेशवर्त्तिन्या योषया बहुभिर्व्रतैः ।
अग्निः शुश्रुषितो यत्र सा स्त्री सोभाग्यमाप्नुयात् ॥६६८

+ V.R.p.389-405, V.M.p.504-507.

In Public domain. Digitization Muthulakshmi Research Academy

पतिशुश्रूषयैव स्त्री सर्वान् कामान् समश्नुते ।
दिवः पुनरिहायाता सुखानां सा निधिर्भवेत् ॥६६९

पतिमुल्लङ्घ्य मोहात्स्त्री कं कं न नरकं व्रजेत् ।
कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न विन्दति ॥६७०

मृते भर्त्तरि या साध्वी ब्रह्मचर्ये व्यवस्थिता ।
साऽरुन्धतीसमाचारा ब्रह्मलोके महीयते ॥६७१*

अथ स्त्रीधर्मे नियोगः परपूर्वाविधिश्च । ६७२-६८०

नियोगात्पावनं कुर्याद्यथोक्तं तद्विशुद्धये ।
द्विजस्य स्त्रीषु धर्मोऽयं शुद्रस्यैके तदाश्रयः ॥६७२

सुखार्थं या प्रवृत्ता स्त्री न भर्त्तुः सूतकाम्यया ।
पुत्रन्तु जनयेदेव निन्द्या पापा च सा स्मृता ॥६७३

भर्त्तृगोत्रं समुत्सृज्य नारी यदन्यमाश्रिता ।
निन्द्यैव सा स्मृता लोके परपूर्वेति चोच्यते ॥६७४

परपूर्वाश्रिता यत्र तत्र स्यान्नाशितः प्रभुः।
क्रमादृते तु धर्म्मोऽयं लब्धा वा स्वामिनो भवेत् ॥६७५

निरोद्धव्या तु ताड्या च परपूर्वापराधतः ।
अक्षमाद्यानबेक्षन्तीं ताडयन् दण्डमर्हति ॥६७६

चौरहस्तान्नदीवेगाद्दुर्भिक्षाद्देशविप्लवात् ।
निस्तार्य वापि कान्ताराल्लब्धा त्यक्ता क्रमागता ॥६७७

आसां भोगे न दोषः स्यादिति शास्त्रविनिश्चयः ।
स्वामिदत्तान्तु गृह्णीयादेषा चेन्न ततोऽन्यथा ॥६७८

दीयमानमथात्मानं या नारी नानुमोदते ।
न सा देया न सा ग्राह्या विधिरेषस्मृतो गुरुः ॥६७९

---

* V.R.p.420-437, Sm.Ch.p.589-596.

In Public domain. Digitization Muthulakshmi Research Academy

न चोत्तमां न चाकामां तथा पुत्रवतीं न च।
ईदृशीं त्वनुरूपेण निष्क्रयेण प्रमीलयेत्।।६८०*

अथ दायविभागः। ६८१

सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः।
पितरो भ्रातरश्चैव विभागो धर्म्य उच्यते।।६८१+

अथ जीवद्विभागादौ विधिः । ६८२-६८७

जीवद्विभागे पिता नैकं पुत्रं विशेषयेत् ।
निर्भाजयेन्नचैवैकमस्मात् कारणं विना ।।६८२

अंशहरोऽर्धहरो वा पुत्रवित्तार्ज्जनात्पिता ।
मातापि पितरि प्रेते पुत्रतुल्यांशभागिनी ।।६८३

अविभक्ते मृते पुत्रे (ऽनुजे) तत्सुतं रिक्थभागिनम्।
कुर्वीत जीवनं येन लब्धं नैव पितामहात्।।६८४

लभेतांशं स पित्र्यन्तु पितृव्यात्तस्य वा सुतात्।
स एवांशस्तु सर्वेषां भ्रातृणां न्यायतो भवेत्।।
लभेत तत्सुतो वापि निवृत्तिः परतो भवेत्।।६८५

पैतामहं समानं स्यात् पितुः पुत्रस्य चोभयोः।
स्वयं स्वोपार्ज्जिते पित्रा न पुत्रः स्वाम्यमर्हति।।६८६

स्वशक्त्यापहृतं नष्टं स्वयं प्राप्तं च यद्भवेत्।
एतत्सर्वं पिता पुत्रैर्विभागे नैव दाप्यते।।६८७*

अथावलुप्तविभागः । ६८८-६९१

प्रच्छादितन्तु यद्येन पुनरागत्य तत्समम ।
भजेरन् भ्रातृभिः सार्धमभावे तु पितुः सुताः ।।६८८

---

* V.R.p.449-54, +Sm.Ch.p.608 & 613 V.M.p.571. * Sm.Ch.p.647-651, V.R.p.482-496, V.M.p.554-573, 646, D.B.Sec.44.

In Public domain. Digitization Muthulakshmi Research Academy

अन्योन्यापहृतं यच्च दुर्विभक्तं च यद्भवेत् ।
पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः ।।६८९
विभक्तेनैव यत्प्राप्तं धनं तस्यैव तद्भवेत् ।
हृतं नष्टञ्च यल्लब्धं प्रागुक्तञ्च पुनर्भजेत् ।।६९०
बन्धुनापहृतं द्रव्यं बलान्नैव प्रदापयेत् ।
बन्धूनामविभक्तानां भोगन्नैव प्रदापयेत् ।।६९१*

अथाप्राप्तव्यवहारादीनां धनरक्षणम् ।६९२-३९३

अप्राप्तव्यवहाराणां च धनं व्ययवर्जितम्।
न्यसेयुर्बन्धमित्रेषु प्रोषितानां तथैव च।।६९२
प्रोषितस्य तु यो भागो रक्षेयुः सर्व एव तम्।
बालपुत्रे मृते रिक्थं रक्ष्यं तत्तु स्वबन्धुभिः।।
पोगण्डा परतस्तन्तु विभजेरन् यथांशतः।।६९३+

अथ क्षेत्रजादीनां विभागे विशेषविधिः। ६९४-६९७

उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः स्मृताः।
सवर्णास्त्वसवर्णास्तु ग्रासाच्छादनभागिनः।।६९४
क्षेत्रिकानुमते बीजं यस्य क्षेत्रं प्रजायते।
तदपत्यं तयोरेव बीजिक्षेत्रिकयोर्मतम्।।६९५
क्षेत्रिकस्य मतेनापि फलमुत्पादयेत्तु यः।
तस्येह भागिनौ तौ तु न फलं हि विनैकतः।।६९६
क्लीबं विहाय पतितं या पुनर्लभते पतिम्।
तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य सः।।६९७++

अथ संसृष्टविभागः ६९८

संसृष्टानां तु संसृष्टाः पृथक्स्थानां पृथक्स्थिताः।
अभावेऽंशहराः ज्ञेया निर्वीजान्योऽन्यभागिनः।।६९८ +++

---

* Sm.ch.p.714-15, V.R.p.526, V.M.p.707, D.B.Sec.176. + V.M.587.
++ V.M.p.604-608, also 615, V.R.p.544 +++ V.R.p.605.

In Public domain. Digitization Muthulakshmi Research Academy

अथापुत्रस्य धनविभागः। ६९९-७०७

मृते भर्त्तरि भत्रंशं लभेत कुलपालिका ।
यावज्जीवन्न हि स्वाम्यन्दानाधमनविक्रये ।।६९९

व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता ।
दमदानरता नित्यमपुत्रापि दिवं व्रजेत् ।।७००

अपुत्रा शयनं भर्त्तुः पालयन्ती गुरौ स्थिता ।
भुञ्जीतामरणात्क्षान्ता दायादा ऊर्ध्वमाप्नुयुः ।।७०१

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी ।
अविभक्ते धनांशं तु प्राप्नोत्यामरणान्तिकम् ।।७०२

भोक्तुमर्हति क्लृप्ताशं गुरुशुश्रूषणे रता ।
न कुर्याद्यदि शुश्रूषाश्चैक्तपिण्डे नियोजयेत् ।।७०३

अपकारक्रियायुक्ता निर्लज्ञा चार्थनाशिका ।
व्यभिचाररता या च स्त्री धनं न च सार्हति ।।७०४

पत्नी पत्युर्धनहरो या स्यादव्यभिचारिणी ।
तदभावे तु दुहिता यद्यनूढा भवेत्तदा ।।७०५

विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत्।
भ्राता वा जननी वाथ माता वा तत्पितुः क्रमात्।* ७०६

अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा।
तदभावे पिता माता भ्राता पुत्राश्च कीर्त्तिताः।।७०७

अथ विभागानधिकारिणः। ७०८-७११

अक्रमोढासुतश्चैव सगोत्राद्यश्च जायते।
प्रव्रज्यावसितश्चैव न ऋकूथं तेषु चार्हति।।७०८

* V.M.p.626-33, 654-5, Sm.Ch.p.677-93, V.R.p.511-514. D.B.sec.133.

In Public domain. Digitization Muthulakshmi Research Academy

अक्रमोढासुतस्त्वृक्थो सवर्णश्च यदा पितुः ।
असवर्णप्रसूतश्च क्रमोढायाश्च यो भवेत् ।।७०९

प्रतिलोमप्रसूता या तस्याः पुत्रो न ऋक्थभाक् ।
ग्रासाच्छादनमत्यर्थं देयं तद्बन्धुभिर्मतम् ।। ७१०

बन्धूनामप्यभावे तु पित्र्यं द्रव्यं तदाप्नुयात् ।
अपित्र्यं तद्धनं प्राप्तं दापनीया न बान्धवाः ।।*७११

अथ विभाज्यानि । ७१२-७२२

पैतामहञ्च पित्र्यञ्च यत्किञ्चित्स्वयमर्जितम्।
दायादानां विभागे तु सर्वमेतद्विभज्यते।।७१२

ऋणं (ऋक्थं) प्रीतिप्रदत्तन्तु दत्त्वा शेषं विभाजयेत्।
आचतुर्थात्तु तद्ग्राह्यं क्रमेणैव तु तत्सुतैः।।७१३

भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम्।
विभागकाले देयं तद्रिक्थिभिः सर्वमेव तु।।७१४

तदृणं धनिने देयं नान्यथैव प्रदापयेत्।
भावितश्चेत्प्रमाणेन विरोधात्परतो यदा।।७१५

पित्र्यं पितृणसम्बद्धमात्मीयञ्चात्मना कृतम्।
ऋणमेवंविधं शोध्यं विमागे बन्धुभिः सह।।७१६

गृहोप(स्कर) करणवाह्याश्च दोह्याभरणकर्मिणः।
दृश्यमाना विभज्यन्ते कोषं गूढेऽब्रवीद्भृगुः।।७१७

धर्मार्थं प्रीतिदत्तञ्च यदृणं स्वनियोजितम्।
तद्दृश्यमानं विभजेन्न दानं पैतृकाद्धनात्।।७१८

दृश्यमानं विभज्येत गृहं क्षेत्रं चतुष्पदम्।
गूढद्रव्याभिशङ्कायां प्रत्ययस्तत्र कीर्त्तितः।।७१९

* V.R.p.491. V.M.p.712. Sm.Ch.p.630-32. D.B.Sec.76-78.

In Public domain. Digitization Muthulakshmi Research Academy

शङ्काविश्वाससन्धाने विभागे विद्यानां सदा।
क्रियासमूहकर्त्तुत्वे शेषमेव प्रदापयेत्।।७२०

भ्रातृणां यस्तु नेहेत धनं शक्तः स्वकर्मणा।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्वोपजीवनम्।।७२१

यथा यथा विभागाप्तं धनं यागार्थतामियात्।
तथा तथा विधातव्यं विद्वद्भिर्भागगौरवम् * ।।७२२

अथ विभक्तलक्षणम् । ७२३

वसेयुर्दशवर्षाणि पृथग्धर्माः पृथक्क्रियाः ।
भ्रातरस्तेऽपि विज्ञेयाः विभक्ताः पैतृकाद्धनात् ।।७२३

अथाविभाज्यानि। ७२४-७४५

नाविद्यानान्तु वैद्येन देयं विद्याधनात्क्वचित्।
समविद्याधिकानान्तु देयं वैद्येन तद्धनम्।।७२४

परभक्तप्रदानेन प्राप्तविद्यो यदन्यतः।
तया प्राप्तन्तु तद्वित्तं विद्याप्राप्तं तदुच्यते।।७२५

उपन्यस्ते च यल्लब्धं विद्यया पणपूर्वकम्।
विद्याधनन्तु तद्विद्याद्विभागे च विभज्यते।।७२६

शिष्यादार्त्विज्यतः प्रश्नात्सन्दिग्धप्रश्ननिर्णयात्।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्।। ७२७

विद्याधनन्तु यत्प्राहुर्विभागे न तद्विभज्यते।
शिल्पेष्वपि हि धर्मोऽयं मूल्याद्यच्चाधिकं भवेत्।।७२८

विद्यापणकृतश्चैव याज्यतः शिष्यतस्तथा।
एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा।।७२९

परं निरस्य यल्लब्धं विद्यया पणपूर्वकम्।
विद्याधनन्तु तद्विद्यान्न विभाज्यं बृहस्पतिः।।७३०

* Sm.Ch.p.617-36. V.R.p.496-98. D.B.Sec.78.

In Public domain. Digitization Muthulakshmi Research Academy

विद्याप्रतिज्ञया लब्धं शिष्यादाप्तश्च यद्भवेत्।
ऋत्विङ्न्यायेन यल्लब्धमेतद्विद्याधनं भृगुः।।७३१

आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते।
तस्मिन्कर्मणि तुष्टेन प्रसादः स्वामिना कृतः।।७३२

तत्र लब्धन्तु यत्किञ्चिद्धनं शौर्येण तद्भवेत्।
ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तत्स्मृतम्।।७३३

संग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम्।
स्वाम्यर्थे जीवितं त्यक्त्वातद्ध्वजाहृतमुच्यते।।७३४

यल्लब्धं लाभकाले तु सजात्या कन्यया सह।
कन्यागतन्तु तद्वित्तं शुल्कं वृद्धिकरं स्मृतम्।।७३५

वैवाहिकन्तु तद्विद्याद्भार्यया यत्सहागतम्।
धनमेवं विधं सर्वं विज्ञेयं कर्मसाधकम्।।७३६

विवाहकाले यत्किञ्चिद्वरायोद्दिश्य दीयते।
कन्यायाः तद्धनं सर्वमविभाज्यं च बन्धुभिः।।७३७

शौर्यप्राप्त विद्यया च स्त्रीधनं चैव यत्स्मृतम्।
एतत्सर्वं विभागे तु न च वैभाज्यमर्थिभिः।।७३८

धनं पत्रनिविष्टन्तु धर्मार्थं यन्निरूपितम्।
उदकञ्चैव दाराश्च निबन्धो यः क्रमागतः।।७३९

धृतं वस्त्रमलङ्कारो नानुरूपञ्च यद्भवेत्।
यथाकालोपयुक्तानि तथा योज्यानि बन्धुभिः।।७४०

गोप्रचारश्च रथ्या च वस्त्रं यच्चाङ्गयोजितम्।
प्रयोज्यं न विभज्येत शिल्पार्थश्च बृहस्पतिः।।७४१

देशस्य जातेः सङ्घस्य धर्मो ग्रामस्य यो भृगुः।
उदितः स्यात्स तेनैव दायभागं प्रकल्पयेत्।।७४२

In Public domain. Digitization Muthulakshmi Research Academy

कुटुम्बं विभृयात् भ्रातुर्यो विद्यामधिगच्छतः।
भागं विद्याधनात्तस्मात् स लभेताश्रुतोऽपि सन्॥७४३

कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा।
शौर्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः॥७४४

कन्यकानां त्वदत्तानां चतुर्थो भाग इष्यते।
पुत्राणां तु त्रयो भागाः साम्यं स्वल्पधने स्मृतम् * ॥७४५

अथ स्त्रीधनकृत्यम् । ७४६-७६०

ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा।
भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥७४६

सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते।
यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनम्॥७४७

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्त्तितम्।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि॥७४८

न भर्त्ता नैव च सुतो न पिता भ्रातरो न च।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः॥७४९

यदि ह्येकतरस्तेषां स्त्रीधनं हरते बलात्।
स वृद्धिं प्रतिदाप्यः स्याद्दण्डञ्चैव समाप्नुयात्॥७५०

व्याधितं व्यसनस्थञ्च धनिकैर्वोपपीडितम्।
दृष्ट्वा निसृष्टं यत्प्रीत्या दद्यादात्मेच्छया हि सा॥७५१

तदेव यद्यनुज्ञाप्य भक्षयेत् प्रीतिपूर्वकम्।
मूलमेव स दाप्यः स्याद्यदा स धनवान् भवेत्॥७५२

अथ चेत्सद्विभार्यः स्यान्न च तां भजते पुनः।
प्रीत्या निसृष्टमपि चेत्प्रतिदाप्यः स तद्धनम्॥७५३

* V.R.p.500-507. Sm.Ch.p.635-641. V.M.p.707-710. D.B.Sec
51,93,96,95.

In Public domain. Digitization Muthulakshmi Research Academy

पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै।
यथाशक्त्या द्विसाहस्राद्दातव्यं स्थावरादृते।।७५४
ग्रासाच्छादनवासानामाच्छेदो यत्र योषितः।
तत्र स्वमाददीत स्त्री विभागमृक्थिनस्तथा।।७५५
भर्तृदायं मृते पत्यौ विन्यसेत्स्त्री यथेष्ठतः।
विद्यमाने तु संरक्षेत् क्षपयेत् तत्कुलेऽन्यथा।।७५६
लिखितस्येति धर्मोऽयं प्राप्ते भर्तृकुले वसेत्।
व्याधिता प्रेतकाले तु गच्छेद्बन्धुकुलं ततः।।७५७
अपकारक्रियायुक्ता निर्लज्जार्थविनाशिका।
व्यभिचाररता स्त्री तु स्त्रीधनं न च सार्हति।।७५८
यज्ञार्थं द्रव्यमुत्पन्नं तथाद्रव्यं नियोजयेत्।
स्थानेषु धर्मयुक्तेषु न स्त्री मूर्खविधर्मिषु।। ७५९
भर्त्ता प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैः।
तिष्ठेद्भर्त्तृकुले जातु न या पितृकुले वसेत् * ।।७६०

अथ स्त्रीधनविभागनिर्णयः ७६१-७६३

भगिन्यो बान्धवैः सार्द्धं विभजेयुः सभर्त्तृकाः।
दुहितृणामभावे तु रिक्थं पुत्रेषु तद्भवेत्।।७६१
अप्रजः स्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि।
अभावे तदनपत्यानां मातापित्रोस्तदिष्यते।।७६२
आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रियाः।
बन्धुदत्तं तु बन्धूनामभावे भर्त्तृगामि तत्।।
स्त्रीधनस्येति धर्मोऽयं विभागस्तु प्रकल्पितः*।।७६३

अथ स्त्रीधनलक्षणम् । ७६४-७७३

अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतितः स्त्रियै।

* Sm.Ch.p.652, 659-69, V.M.p.690-694. * Sm.Ch.p.661-667, V.M.p.695-705, V.R.p.518, D.B.sec.61-71.

In Public domain. Digitization Muthulakshmi Research Academy

मातृभ्रातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्।।७६४

प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः।
भर्त्तुः स्वाम्यं सदा तत्र शेषन्तु स्त्रीधनं भवेत्।।७६५

विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम्।।७६६

यत्पुनर्लभते नारी नीयमाना हि पैतृकात्।
अध्यावाहनिकं नाम स्त्रीधनं समुदाहृतम्।।७६७

प्रीत्या प्रदत्तं यत्किञ्चिच्छ्वश्रा श्वशुरेण वा।
पादबन्दनिकं यत्तल्लावण्यार्जितमुच्यते।।७६८

विवाहात्परतो यत्तु लब्धं भर्त्तृकुलात्स्त्रिया।
अन्वाधेयन्तु तत्प्रोक्तं यल्लब्धं स्वकुलात्तथा।।७६९

ऊर्ध्वं लब्धन्तु यत्किञ्चित् संस्कारात् प्रीतितः स्त्रिया।
भर्त्तुः पित्रोः सकाशाद्वा अन्वाधेयन्तु तद्भृगुः।।७७०

गृहोपस्करबाह्यानां दोह्याभरणकर्मिणाम्।
मूल्यं लब्धञ्च यत्किञ्चिच्छुल्कं तत्परिकीर्तितम्।।७७१

तत्र सोपधि यद्दत्तं यच्च योगवशेन वा।
पित्रा भ्रात्राऽथवा पत्या न तत् स्त्रीधनमुच्यते।।७७२

पितृभ्याञ्चैव यद्दत्तं दुहितुः स्थावरं धनम् * ।
अतीतायामप्रजसि भ्रातृगामि तु सर्वदा + ।।७७३

अथ द्यूतसमाह्वयः । ७७४-७७७

द्यूतं नैव तु सेवेत कामक्रोधविवर्द्धनम्।
असाधुजननं क्रूरं नराणां द्रव्यनाशनम्।।७७४

---

* Attributed to Briddha - Katyayana in the Daya-bhaga,
+ V.M.p.678-694, V.R.p.522-24, D.B.Sec.69 53.

In Public domain. Digitization Muthulakshmi Research Academy

ध्रुवं द्यूतात्कलिर्यस्माद्विषम् सर्पमुखादिव।
तस्माद्राजा निवर्त्तेत विषये व्यसनं हि तत्।।७७५

वर्त्तेत चेत्प्रकाशन्तु द्वारावस्थिततोरणम्।
असम्मोहार्थमार्याणां कारयेत् तत्करप्रदम्।।७७६

सभिकः कारयेद्द्यूतं देयं दद्यात्स्वयं नृपे।
दशकं तु शतं वृद्धिः गृह्णीयाच्च पराजये।।७७७

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

ISBN No. 978-93-80171-36-4
In Public domain. Digitization Muthulakshmi Research Academy

SANSKRIT ACADEMY
Adarsh Shodh Sanstha,
Recognized by Rashtriya Sanskrit Sansthan
Osmania University Campus
Hyderabad - 07